श्रीः ।

शास्त्रमुक्तावली, ५०.

श्री शै० पू० यादवाद्रिनिवासि श्रीमदनन्ताचार्यविरचितं

श्रीलक्ष्मीहिरण्यगर्भम् ।

श्रीकाञ्ची प्रतिवादिभयङ्कर अनन्ताचार्येण
परिशोधितम् ।

श्रीसुदर्शनमुद्राक्षरशालायां
अमुद्रयत ।

श्रीकाञ्ची ।

१९३०

Allright reserved.

॥ श्रीः ॥

॥ श्रीहयग्रीवाय नमः ॥

सत्प्रतिपक्षविभाजकपत्रम् ।

(श्रीशैलानन्तपूरुषकुलतिलकयादवाद्रिनिवासि श्रीमदनन्ताचार्यवर्यकृतं शतकोटिखण्डनम् ।)



यस्य श्रीनखकान्तिनाकसरितः कूर्मायतेऽङ्घ्रिद्वयं
सेवानम्रसुरेन्द्रवज्रमकुटीमाला मराळायते ।
पश्यन्निर्झरयोषिदम्बकततिर्मीनप्रपञ्चायते
क्षोणीशाञ्जलयः पयोजमुकुळन्त्यव्यात्स नारायणः ॥

—— (*) ——

प्रकृतपक्षतावच्छेदकावच्छिन्नाविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सतीत्यादि। अत्र प्रतिबन्धकतावच्छेदकत्वं न स्वरूपसम्बन्धरूपम् , सत्प्रतिपक्षोन्नायकेऽतिव्याप्तेरवारणात् ; वह्न्यभावव्याप्यव्याप्यवान् वह्न्यभाववान्वह्न्यभावव्याप्यव्याप्यवांश्च ह्रद इति निश्चययोरेकविशिष्टापरत्वेन प्रतिबन्धकतया तादृशप्रतिबन्धकतावच्छेदकत्वस्य वह्न्यभावव्याप्यव्याप्यवद्ह्रदत्वावच्छिन्नविषयतायामक्षतत्वात्। एवं वह्न्यभावव्याप्यकालीनह्रदो महानसीयवह्निमानित्यादौ वह्न्यभावव्याप्यमहानसीयवह्न्यभाववान् तादृशह्रद इति ज्ञानविषये महानसीयवह्न्यभाववत्तादृशह्रदरूपबाधेऽतिव्याप्तिवारणायानतिरिक्तवृत्तित्वरूपं जनकतावच्छेदकत्वं निवेशनीयम् । न चाव्यापकविषयताशून्यत्वेन तादृशज्ञानवारणसम्भवः, वह्निसामान्याभावव्याप्यमहानसीयवह्न्यभावरूपाविशिष्टाप्रसिध्या तादृशविशिष्टविषयिताया

अव्यापकत्वासम्भवात्, वह्न्यभावव्याप्यत्वावच्छिन्नविषयितायाश्च विशिष्ट पक्षघटितबाधविषयताव्यापकत्वात् । यद्धर्मावच्छिन्नप्रतिबध्यतानिरूपित प्रतिबन्धकत्वं सत्यन्तार्थः— तद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता निवेशेनैव तत्रातिव्याप्तिवारणेऽप्यभावव्यापकीभूताभावप्रतियोगिकालीनह्रदः प्रमेयाभाववानित्यादौ प्रमेयाभावव्यापकीभूताभावप्रतियोगिप्रमेयवान् तादृश ह्रद इति ज्ञानमादाय प्रमेयवत्तादृशह्रदरूपबाधेऽतिव्याप्तिर्बोध्या, प्रमेयाभावत्वस्याभावव्यापकीभूताभावप्रतियोगिप्रमेयत्वस्य चाप्रसिध्या यद्रूपपदेन तयोरुपादातुमशक्यत्वात्—अन्येषां च तादृशबाधघटकत्वात् । एवं चानाहार्यापामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयित्व — व्यापकं तादृशप्रतिबन्धकत्वजनकत्वोभयं तद्रूपावच्छिन्नत्वमिति फलितम् । अत्र चानाहार्यत्वमव्यवहितोत्तरक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन इच्छावदन्यत्वम् । तादृशदोषविषयकनिश्चयसामान्यं स्वसमानाधिकरणेच्छा व्यवहितोत्तरवृत्ति तादृशदोषस्य प्रामाणिकत्वे जन्यतासम्बन्धेनेच्छावदन्यत्व मेव तत्, आहार्यज्ञाने इच्छाया हेतुत्वोपगमात् न तस्य तथात्वम् । सिद्धिकालीनानुमितौ इच्छाया न हेतुत्वम्, किन्तु सिद्धिप्रतिबन्धकतायामुत्तेजकत्वमेव । जन्यतासम्बन्धेनेच्छावदन्यत्वं च स्वनिरूपितजन्यतावच्छेदक विषयितासम्बन्धावच्छिन्नेच्छात्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेद — वत्वम्, तेन जन्यज्ञानसामान्यस्य ईश्वरेच्छाजन्यत्वेऽपि न क्षतिः । अप्रामाण्यज्ञानानास्कन्दितत्वं च विषयत्वसामानाधिकरण्यकालिकविशेषणत्वैतत्त्रितयसम्बन्धेन भ्रमविशिष्टान्यत्वम्, न तूक्तत्रितयसम्बन्धेन ज्ञानविशिष्टान्यत्वम्, सर्वज्ञानं गुणभिन्नं मेयत्वादित्यादौ गुणत्वव्याप्यवत्सर्वज्ञानत्वावच्छिन्नात्मकसत्प्रतिपक्षेऽव्याप्तेः, तत्र सत्प्रतिपक्षज्ञानस्योक्तत्रितयसम्बन्धेन स्वात्मकज्ञानविशिष्टत्वात् । सम्बन्धकोटौ स्वाभिन्नत्वस्यापि निवेशे स्वांशेऽप्रामाण्यावगाहिज्ञानाव्यावृत्तेः ।

यत्तु तत्र सर्वज्ञानत्वेन स्वाभिन्नज्ञानमात्रावगाहिसत्प्रतिपक्षनिश्चयमादायैव लक्षणसमन्वय इति; तन्न, किञ्चिद्धर्मावच्छिन्नविशेषणतापन्नसर्वत्वावच्छिन्नविशेष्यकज्ञानस्य कतिपयवस्तुविषयकत्वासम्भवस्य प्रतिज्ञाग्रन्थे

गादाधर्यामेवोक्तत्वात् । यदपि अव्यापकविषयिताशून्यत्वविशेषणेनाप्रामाण्य ग्रहात्मकनिरुक्तसत्प्रतिपक्षवारणसम्भवात् स्वभिन्नत्वस्य सम्बन्धकोटौ निवेशेऽपि नक्षतिरिति;तन्न, अप्रमात्वविशिष्टज्ञानकालीनह्रदादिपक्षकस्थलीय सत्प्रतिपक्षाव्याप्तेः ; तत्राप्रामाण्यवज्ज्ञानत्वावच्छिन्नविषयताया अव्यापकत्वा सम्भवेन स्वांशे अप्रामाण्यावगाहिज्ञानाव्यावृत्तेः । तस्मादुक्तसम्बन्धत्रयेण भ्रमविशिष्टान्यत्वमेव अप्रामाण्यज्ञानानास्कन्दितत्वम्। भ्रमत्वं च स्वानुयोगि निष्ठविशेष्यतानिरूपितत्वस्वप्रतियोगिनिष्ठत्वस्वावच्छिन्नत्वैतत्त्रितयसम्बन्धेन सम्बन्धविशिष्टान्यप्रकारताशालित्वमनुगतं हेतुग्रन्थे निरुक्तम्।स्वावच्छिन्नप्रति बन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्व — सामानाधिकरण्योभयसम्बन्धेन विधितावशिष्टविषयिताशून्यज्ञानत्वं निश्चयत्वम् , तेन कोटिद्वयविशेष्यकस्य कोटिद्वयप्रकारकस्य एककोटिविशेष्यकापरकोटिप्रकारकस्य च संशयस्य सा. मान्याभावव्यवस्थापनादावुक्तस्यापि व्यावृत्तिः ॥

यत्तु प्रकारितान्तरावच्छिन्नप्रकारिताशून्यत्वे सति विशेष्यितान्तरा वच्छिन्नविशेष्यिताशून्यत्वमेव निश्चयत्वम् , कोटिद्वयप्रकारकसंशयीयकोटि द्वयीयप्रकारितयोः कोटिद्वयविशेष्यकसंशयीयविशेष्यितयोश्चावच्छेद्यावच्छे दकभावस्वीकारादिति। तन्न,ययोर्विषयतयोर्निरूप्यनिरूपकभावस्तन्निरूपित विषयितयोरवच्छेद्यावच्छेदकभावस्य नियतत्वेन वह्न्यभावव्याप्यवान् ह्रद इति ज्ञानीयवह्निविषयित्वाभावविषयित्वयोरवच्छेद्यावच्छेदकभावसत्त्वेन तादृशज्ञाने प्रकारितान्तरावच्छिन्नप्रकारिताशून्यत्वासम्भवेनासम्भवात्।प्रका रितात्वेनावच्छेद्यावच्छेदकभावनिवेशेऽपि विशिष्टवैशिष्ट्यावगाहिबोधे विशे षणतावच्छेदकस्य धर्मिपारतन्त्र्येण धर्मिणि प्रकारतया तत्रैकप्रकारित्वा वच्छिन्नापरप्रकारितासत्त्वेन तादृशज्ञानस्यलक्षणाघटकत्वेनासम्भवप्रसङ्गात्। विशिष्टवैशिष्ट्यावगाहिज्ञानस्यैव जनकत्वेन तादृशज्ञानमादायैव लक्षणस्व समन्वेतव्यत्वात् । तत्रावच्छेद्यावच्छेदकभावास्वीकारे पक्षे परम्परया व्याप्तिं विशेष्ये विशषणमिति रीत्या वह्न्यभावव्याप्यं चावगाहमानात्समूहा लम्बनात्मकज्ञानाद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानस्य वैलक्षण्यानुपपत्तिः ।

न च तादृशज्ञानयोर्वैलक्षण्यनिर्वाहाय प्रकारतयोरवच्छेद्यावच्छेदकभावः-न तु प्रकारितयोरिति वाच्यम्,-विनिगमनाविरहेण प्रकारितयोरप्यवच्छेद्यावच्छेदकभावसिद्धेः । स्वनिरूपकतानवच्छेदकधर्मावच्छिन्ननिरूपितत्वस्वावच्छिन्नत्वोभयसम्बन्धेन प्रकारिताविशिष्टप्रकारिताशून्यत्वं निश्चयत्वमिति विवक्षणेनोक्तदोषवारेणऽपि ह्रदो वह्न्यभावव्याप्यवान् ह्रदे वह्न्यभावव्याप्यो नास्तीत्याकारकस्यैककोटिप्रकारकापरकोटिविशेष्यकस्य सामान्याभावव्यवस्थापनोक्तसंशयस्याव्यावृत्तेः । वस्तुतस्तु स्वावच्छिन्नविरोध्यनुमिति जनकतावच्छेदकविषयितावत्त्व — स्वप्रतियोग्युपहितत्वोभयसम्बन्धेनाभाव विशिष्टान्यत्वमेवाप्रामाण्यज्ञानाभावादिविशिष्टत्वम्,न तु स्वावच्छिन्नप्रकृतानुमितिप्रतिबन्धकतावच्छेदकविषयितावत्त्व-स्वप्रतियोग्युपहितत्वोभयसम्बन्धेनाभावविशिष्टान्यत्वम्, तथा सति सामानाधिकरण्यांशे अप्रामाण्यज्ञानास्कन्दितस्य व्यापकसामानाधिकरण्यघटितसत्प्रतिपक्षनिश्चयस्याव्यावृत्त्या तत्राव्याप्तेः, तादृशज्ञाने विरोध्यनुमितिजनकताविरहात् । न च प्रतिबन्धकतायां प्रकृतानुमितिनिरूपितत्वमनिवेश्यस्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयितावत्त्वघटितोभयसम्बन्धेनाभावविशिष्टान्यत्वनिवेशान्नोक्ताव्याप्तिः, सामानाधिकरण्यांशेऽप्रामाण्यज्ञानस्य प्रकृतानुमितिप्रतिबन्धकतावच्छेदकाभावप्रतियोगित्वविरहेऽपि सामानाधिकरण्याभाववत्तानुद्धिप्रतिबन्धकतावच्छेदकाभावप्रतियोगित्वानपायादिति वाच्यम्,-तथा सति अव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामतेऽव्याप्यवृत्तिघटाभाववद्भूतलकालीनह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवत्तादृशह्रदरूपसत्प्रतिपक्षाव्याप्तेः, तत्र सत्प्रतिपक्षविषयकनिश्चयसामान्यस्य घटाभावत्त्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकीभूताभावप्रतियोग्युपहिततयोक्तोभयसम्बन्धेनाभावविशिष्टान्यस्य तादृशसत्प्रतिपक्षनिश्चयाप्रसिद्धेः । एवं सामान्यमुखव्याप्तिस्थलीयानुमितौ तत्तत्साधनधर्मिकतत्तत्साध्यनिरूपितव्याप्तिग्रहाभावाविशिष्टतत्तत्साध्यसाधनोपस्थितेः प्रतिबन्धकतायास्सिद्धान्तलक्षणादौ उक्तत्वेन संयोगसामान्याभावव्याप्यसंयोगाय यावद्विशेषाभावकालीनह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवत्तादृशह्रदरूप

सत्प्रतिपक्षाव्याप्तेः, स्वावच्छिन्नप्रतिबन्धकतावच्छेदकीभूतसाध्यसाधनविषयित्वस्वप्रतियोगिभूतव्याप्तिग्रहोपहितत्वोभयसम्बन्धेनाभावविशिष्टतया-तदन्यतादृशसत्प्रतिपक्षनिश्चयाप्रसिद्धेः। प्रकृतानुमितिप्रतिबन्धकतानिवेशेऽपि सिद्धघटकालीनेष्टसाधनघटकालीनह्रदो वह्निमानित्यादौ सत्प्रतिपक्षाव्याप्तेः, सिद्धत्वज्ञानाभावविशिष्टेष्टसाधनताज्ञानादिरूपेच्छासामग्र्या अनुमितिप्रतिबन्धकत्वात्। तस्मात्स्वावच्छिन्नजनकतावच्छेदकविषयितावत्त्वघटितोभयसम्बन्धेनाभावविशिष्टान्यत्वमेव निवेशनीयम्।

एतेनोक्तसत्प्रतिपक्षलक्षणस्य वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्वृदेऽतिव्याप्तिरिति शङ्का निरस्ता, स्वावच्छिन्नजनकतावच्छेदकविषयतावत्त्वघटितोभयसम्बन्धेनाभावविशिष्टान्यत्वस्य वह्न्यभाववद्वृदांशेऽप्रामाण्यज्ञानास्कन्दितेऽप्युक्तोभयवद्वृदविषयकनिश्चये सत्त्वेन तत्र प्रतिबन्धकत्वाभावेनातिव्याप्त्यप्रसक्तेः।

अथ समानबललक्षणेऽप्रामाण्यग्रहाभावस्य स्वातन्त्र्येणानुमितिहेतुतापक्षस्योक्तत्वेन तत्पक्षे स्वावच्छिन्नजनकतावच्छेदकविषयितावत्त्वघटितोभयसम्बन्धेनाभावविशिष्टान्यत्वस्य ज्ञानेनिवेशासम्भवात् प्रतिबन्धकतावच्छेदकघटितोभयसम्बन्धेनाभावविशिष्टान्यत्वमगत्या निवेशनीयम्, तत्पक्षसाधारण्यानुरोधात्, सामानाधिकरण्यांशेऽप्रामाण्यज्ञानादेश्च तत्तद्व्यक्तित्वावच्छिन्नाभावा निवेशनीयाः, तथा चोक्तोभयवद्वृदेऽतिव्याप्तिरिति चेन्न; तथापि वह्न्यभावव्याप्यव्याप्यांशेऽप्रामाण्यग्रहास्कन्दितोक्तनिश्चयस्यापिलक्षणघटकत्वेन तत्राप्रामाण्यग्रहस्योत्तेजकतापक्षे जनकताविरहेण वह्न्यभावव्याप्यव्याप्यांशे संशयात्मकज्ञानस्यापि संग्रहेण तत्र पक्षद्वये जनकताविरहेणातिव्याप्त्यप्रसक्तेः।

वस्तुतस्तु अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकत्वस्य प्रतिबन्धकत्वजनकत्वोभयस्मिन्निवेशे

यादृशस्थलविशेषे प्रतिबन्धकीभूतज्ञानं साध्याभावव्याप्यजलत्वादिना—घटाद्यवगाह्येव साध्याभावव्याप्यविशिष्टपक्षादिज्ञानं संशयादिरूपमेव तत्रानाहार्याप्रामाण्यज्ञानानास्कन्दितयद्रूपावच्छिन्नविषयिकनिश्चयाप्रसिद्ध्या — ऽव्याप्तिरिति केवलयद्रूपावच्छिन्नविषयिताव्यापकत्वमेव प्रतिबन्धकत्वजनकत्वोभयस्मिन्निवेश्य परिष्कर्तव्यम् , व्यापकताघटकसम्बन्धश्च स्वावच्छेदकाभावप्रतियोग्युपहितत्व-स्वाश्रयत्वान्यतरसम्बन्ध इति नासम्भवः । न चैवं पर्वतो वह्निमानित्यादौ अप्रामाण्यवत्सत्प्रतिपक्षभ्रमेऽतिव्याप्तिः, तत्राप्रामाण्यप्रकारकतादृशज्ञानविशेष्यकज्ञानसामान्ये स्वावच्छेदकाभावप्रतियोग्युपहितत्वसम्बन्धेन प्रतिबन्धकत्वजनकत्वोभयसत्त्वादिति वाच्यम्,-अहार्यज्ञानेऽपि निरुक्ताप्रामाण्यवज्ज्ञानत्वावच्छिन्नविषयितासत्त्वेन तत्रोक्तसम्बन्धेन प्रतिबन्धकताविरहात् ; अनाहार्यज्ञानस्यैव प्रतिबन्धकतावच्छेदकाभावप्रतियोगित्वात् , अप्रामाण्यज्ञानगताहार्यत्वस्य च सत्प्रतिपक्षज्ञानप्रतिबन्धकतावच्छेदकाभावप्रतियोग्युपहितत्वविरहात् । लक्षणे तथैव निवेश्यत्वात् । न चाप्रामाण्यग्रहधर्मिकाप्रामाण्यग्रहकालीनबाधादिग्रहसत्त्वेऽनुमितिवारणाय—तत्राप्रामाण्यग्रहधर्मिकाप्रामाण्यग्रहविशिष्टबाधनिश्चयस्य पृथक्प्रतिबन्धकता या बाधग्रन्थे व्यवस्थापितत्वेन तादृशनिश्चयेऽपि यद्रूपावच्छिन्नविषयितासत्त्वेन तत्राप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वावच्छिन्नप्रतिबन्धकताविरहादसम्भव इति वाच्यम्,-तत्रापि स्वावच्छेदकाभावप्रतियोग्युपहितत्वसम्बन्धेन प्रतिबन्धकतासत्त्वेन व्यापकत्वानपायात् । अस्यायमनुगमः— प्रकृतानुमितित्वव्यापकप्रतिबध्यतावृत्तिरूपवत्त्वसत्प्रतिपक्षत्वम् । प्रतिबध्यतावृत्तित्वं च रूपे स्वसमानाधिकरणभेद प्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । स्वाधिकरणता स्वावच्छिन्नविषयकत्वसम्बन्धेन । भेदप्रतियोगितावच्छेदकता स्वनिरूपितप्रतिबन्धकतावत्त्वस्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावत्त्वोभयसम्बन्धावच्छिन्ना । प्रतिबन्धकतावत्त्वं जनकतावत्त्वं च स्वावच्छेदकाभावप्रतियोग्युपहितत्व-स्वाश्रयत्वान्यतरसम्बन्धेनेति । एवञ्च वह्न्यभाववद्वह्न्यभावव्याप्य

व्योप्याभयवद्वृदऽतिव्याप्तिरवतरत्येव , उक्तान्यतरसम्बन्धेन प्रतिबन्धकत्व जनकत्वोभयोरुक्तोभयवद्वृदत्वविच्छिन्नविषयिताव्यापकत्वात् ।

अत्र केचित्— विशिष्टान्तराघटितत्वविशेषणेनोक्तोभयवद्वृद-वारणसम्भवः । यत्तु विशिष्टान्तराघटितत्वं यदि स्वावच्छिन्नाविषयक-प्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयिताव्यापिका प्रकृतानुमितिप्रतिब-न्धकता तद्रूपावच्छिन्नाघटितत्वरूपं तदा वह्न्यभाववद्वृदरूपविशिष्टान्तर घटितत्वेन उक्तोभयवद्वृदवारणसम्भवेऽपि बाधघटितसत्प्रतिपक्षेऽव्याप्ति वारणाय प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्ववज्जनकतानतिरिक्तवृत्ति त्वस्यापि निवेशनीयतया उक्तातिप्रसङ्गो दुर्वारः ; न च यद्रूपावच्छिन्नविषय. कत्वं निरुक्तविरोध्यनुमितिजनकतानतिरिक्तवृत्ति तादृशरूपान्तराघटित त्वस्य विवक्षणेऽपि मेयत्वविशिष्टसत्प्रतिपक्षेऽतिव्याप्तिवारणसम्भवात् न नि-रुक्तातिव्याप्तिः, तादृशोभयवद्वृदस्य तादृशविशिष्टान्तरेण वह्न्यभावव्याप्य व्याप्यवद्वृदेन घटितत्वादिति वाच्यम्, वह्न्यभावव्याप्यवह्न्यभावव्याप्यव्याप्य वद्वृदादिरूपसत्प्रतिपक्षाव्याप्तिवारणाय प्रतिबन्धकतानतिरिक्तत्वस्यापि वि-शिष्टान्तरविषयितायां निवेशनीयतया उक्तविशिष्टेऽतिव्याप्तितादवस्थ्यादिति ; तन्न, स्वव्याप्याविरोध्यनुमितिजनकताव्यापकत्व स्वाभाववद्वृत्तित्वोभयसम्ब-न्धेन प्रकृतानुमितिप्रतिबन्धकताविशिष्टान्यत्वस्य विशिष्टान्तराघटितत्व शरीरप्रविष्टप्रतिबन्धकतायां निवेशेन केवलप्रतिबन्धकताघटित विशि-ष्टान्तराघटितत्वनिवेशेऽपि बाधघटितसत्प्रतिपक्षाव्याप्तिविरहात् , ह्रद-स्समानाधिकरणजलाभाववानित्यादौ जलव्यापकसमानाधिकरणजलसमा नाधिकरणजलवद्वृदरूपबाधघटितसत्प्रतिपक्षज्ञानीयप्रतिबन्धकताविशिष्टत्वा त्तद्घटकबाधज्ञानीयप्रतिबन्धकताया इति तत्र तादृशबाधघटितत्वस्या-किञ्चित्करत्वात् । स्वाभावश्च स्वाश्रयत्व-स्वावच्छेदकत्वान्यतरसम्बन्धा-वच्छिन्नप्रतियोगिताको ग्राह्यः , तेन मेयत्वविशिष्टसत्प्रतिपक्षे नातिव्याप्तिः, सत्प्रतिपक्षज्ञानीयप्रतिबन्धकतयोः परस्परं स्वरूपसम्बन्धावच्छिन्नपरस्परा

भावसामानाधिकरण्येऽपि स्वाश्रयत्व-स्वावच्छेदकत्वान्यतरसम्बन्धावच्छिन्न परस्परात्यन्ताभावसामानाधिकरण्यविरहात् । एवञ्च निरुक्तकेवलप्रतिबन्धकताघटितविशिष्टान्तराघटितत्वेनोक्तोभयवद्वृदवारणसम्भवः । एवं केवल जनकताघटितविशिष्टान्तराघटितत्वनिवेशेऽपि वह्न्यभावव्याप्यवह्न्यभावव्याप्यव्याप्यवद्वृदे नाव्याप्तिः ; तादृशजनकतायां स्वव्यापकत्व-स्वाभाव—वद्वृत्तित्वोभयसम्बन्धेन विरोध्यनुमितिजनकताविशिष्टान्यत्वस्य निवेशात्, यद्धर्मावच्छिन्नजन्यतानिरूपितजनकताविशेष्यदळप्राविष्टा तद्धर्मावच्छिन्नजन्यतानिरूपितजनकताघटितविशिष्टान्तराघटितत्वस्य वा निवेशनीयत्वात् । न च यत्त्वतत्त्वनिवेशादननुगम इति वाच्यम् ,-अनुगमस्यापि कथञ्चित्सम्भवात्। तथाहि- जन्यतावैशिष्ट्यरूपवत्त्वं विशिष्टान्तराघटितत्वघटितसत्प्रतिपक्षत्वम् । जन्यतावैशिष्ट्यं चाधेयत्व-स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेद—वत्त्वोभयसम्बन्धेन। आधेयता च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धावच्छिन्ना। स्वाधिकरणता-स्वावच्छिन्नविषयितावत्त्वसम्बन्धावच्छिन्ना। भेदप्रतियोगितावच्छेदकता स्वविशिष्टप्रतिबध्यतानिरूपितप्रतिबन्धकतावत्त्वस्वनिरूपितजनकतावत्त्वोभयसम्बन्धावच्छिन्ना।स्ववैशिष्ट्यञ्चप्रतिबध्यतायांआधेयतासम्बन्धेन।आधेयता च स्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नत्वसम्बन्धावच्छिन्ना।द्वितीयसम्बन्धघटकस्वनिष्ठावच्छेदकता स्वविशिष्टरूपविशिष्टत्वसम्बन्धावच्छिन्ना। रूपे स्ववैशिष्ट्यञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन । तत्र स्वाधिकरणता-स्वावच्छिन्नविषयिताशालिनिश्चयत्वसम्बन्धावच्छिन्ना।भेदप्रतियोगितावच्छेदकतास्वावच्छेदकावच्छिन्नजन्यतानिरूपितजनकतावत्त्वसम्बन्धावच्छिन्ना । रूपविशिष्टत्वञ्च स्वाविशिष्टप्रतीतिविषयितावच्छेदकत्वसम्बन्धावच्छिन्नाधेयत्वस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वोभयसम्बन्धेन । प्रतीतौ स्ववैशिष्ट्यं च स्वावच्छिन्नविषयतानिरूपकत्वसम्बन्धावच्छिन्नस्वनि

ष्टावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । स्वनिष्ठावच्छेदकता स्वविशिष्टप्रतीतिविषयतावच्छेदकत्वसम्बन्धावच्छिन्ना । प्रतीतौ स्ववैशिष्ट्यञ्च-पूर्वोक्तसम्बन्धेनेति । एवञ्च निरुक्तकेवलजनकत्वघटितविशिष्टान्तराघटितत्वविशेषणेनोभयवद्धदवारणसम्भवः । एवं स्वावच्छिन्नाविषयकप्रतीतिविषयतावद्रूपावच्छिन्नविषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति,यादृशविशिष्टान्तरविषयकत्वं जनकतानतिरिक्तवृत्तितादृशविशिष्टद्वयविषयिताशून्यप्रतीतिविषयत्वरूपजनकत्वप्रतिबन्धकत्वोभयघटितविशिष्टान्तराघटितत्वविशेषणेनाप्युक्तातिव्याप्तिवारणसम्भवः,उक्तपरिष्कारे बाधघटितसत्प्रतिपक्षे वह्न्यभावव्याप्यवह्न्यभावव्याप्यव्याप्यवद्धदे चाव्याप्तिविरहात् । एतेनोक्तरीत्या जनकतायामुक्तोभयसम्बन्धेन जनकताविशिष्टान्यत्वस्य यद्धर्मावच्छिन्नजन्यतानिरूपितजनकता विशेष्यदलप्रविष्टा तद्धर्मावच्छिन्नजन्यतानिरूपितत्वस्य वा निवेशे वह्न्यभावव्याप्यत्वविशिष्टं यज्जलव्यापकवह्न्यभावसमानाधिकरणजलं तद्विशिष्टह्रदेऽतिव्याप्तिः , तत्र सत्प्रतिपक्षज्ञानजनकताया उक्तोभयसम्बन्धेन उन्नायकजनकताविशिष्टत्वात् , वह्न्यभावव्याप्यत्वावच्छिन्नानुमितिनिष्ठजन्यतामादायोक्तानुगमरीत्या विशिष्टान्तराघटितत्वसम्भवाच्चेति निरस्तम् । विवेचयिष्यते चेदमुपरिष्टादिति वदन्ति ।

अन्ये तु—

सत्यन्तघटकप्रतिबन्धकतायां निरुक्तजनकतावच्छेदकविषयितात्वव्यापकतावच्छेदकत्वनिवेशान्नोक्तातिप्रसङ्गः , प्रत्येकज्ञानीयवह्न्यभावव्याप्यव्याप्यवद्धदविषयितायां निरुक्तजनकतावच्छेदिकायां प्रतिबन्धकतावच्छेदकत्वविरहात् । न च निरुक्तसत्प्रतिपक्षोन्नायकविषयितायां निरुक्तजनकतावच्छेदिकायां सत्प्रतिपक्षज्ञानीयप्रतिबन्धकतावच्छेदकत्वविरहेण सर्वत्रासम्भव इति वाच्यम्, जनकयत्किञ्चिज्ज्ञानीयविषयितात्वव्यापकत्वनिवेशेनासम्भवविरहात् । वह्न्यभावव्याप्यवान् ह्रद इति ज्ञानमादायैव लक्षणगमनसम्भवात् । न च धर्मितावच्छेदकनिष्ठप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतामादायासम्भव इति वाच्यम् , जनकयत्किञ्चिज्ज्ञानीय—

यत्किञ्चित्त्वनिवेशादननुगम इति वाच्यम् , पूर्वोक्तभेदप्रतियोगितावच्छेदकतायास्स्वविशिष्टप्रतिबन्धकतावत्त्वसम्बन्धावच्छिन्नत्वेन विवक्षणीयत्वात् । प्रतिबन्धकतायां स्ववैशिष्ट्यं च स्वनिरूपितत्व-स्वविशिष्टज्ञानविशिष्टत्वोभयसम्बन्धेन ज्ञाने स्ववैशिष्ट्यं । च स्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावत्त्वसम्बन्धेन। ज्ञानवैशिष्ट्यञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्न-स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन। स्वाधिकरणता स्वीयकिञ्चिदवच्छिन्नविषयितात्वसम्बन्धावच्छिन्ना ; भेद प्रतियोगितावच्छेदकता स्वावच्छेदकसम्बन्धावच्छिन्नेति ।

यत्तु- उक्तरीत्यासम्भववारणाययत्किञ्चिज्जनकतावच्छेदकविषयितात्व व्यापकतावच्छेदकताकत्वं प्रतिबन्धकतायां निवेशनीयम् , तथा च सत्प्रतिपक्षज्ञानीयजनकतामादायैव लक्षणगमनान्नासम्भव इति । तन्न, वक्ष्यमाणरीत्या जनकतायां यत्किञ्चित्त्वनिवेशेऽपि ज्ञाने यत्किञ्चित्त्वनिवेशस्यावश्यकतया तत एवोक्तदोषवारणे जनकतायां यत्किञ्चित्त्वनिवेशानावश्यकत्वात्। एकरूपेण जनकतापक्षसाधारण्यानुरोधस्य वक्ष्यमाणत्वाच्च ।

यत्तु जनकयत्किञ्चिज्ज्ञानीयायां सामानाधिकरण्यविषयितायां सत्प्रतिपक्षज्ञानीयप्रतिबन्धकतावच्छेदकत्वविरहेण प्रतिहेतुव्यापकसाध्याभाव समानाधिकरणप्रतिहेतुमत्पक्षरूपसत्प्रतिपक्षाव्याप्तिप्रसङ्ग इति । तन्न ; जलव्यापकवह्न्यभावसमानाधिकरणजलवान्न वेति संशयव्यावृत्तनिश्चयत्व–शरीरघटकतया सामानाधिकरण्यविषयतायाः अपि तादृशप्रतिबन्धकतावच्छेदकसम्भवात् । तथाहि— स्वावच्छेदकधर्मिपर्याप्तावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताकत्व–सम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्व-स्वनिरूपितह्रदत्वावच्छिन्नविशेष्यताकत्वोभयसम्बन्धेन जलत्वावच्छिन्नप्रकारताविशिष्टज्ञानत्वं हि जलनिश्चयत्वम्। जलव्यापकवह्न्यभावसमानाधिकरणजलवान् जल

सामान्याभाववान्वेति संशयस्यापि व्यावृत्तिः। स्वावच्छेदकतायाः पर्याप्त्य निवेशात् प्रतियोगितावच्छेदकतापर्याप्तिनिवेशाच्च ह्रदस्समुद्रजलवान्न वा जलवांश्च ह्रद इत्यांशिकनिश्चयस्य सङ्ग्रहः। तथा च स्वनिरूपितावच्छेदक तात्वेन सामानाधिकरण्यविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वात्। प्रतिबन्धकतावच्छेदकतावच्छेदकसम्बन्धघटकस्यापि अवच्छेदककोटिप्रवि ष्टानामप्यवच्छेदकत्वे प्रतिबन्धकतावच्छेदकत्वसम्भवात्। अतएव प्रतिज्ञो त्तरहेतूत्तरोदाहरणोत्तरोपनयनोत्तरत्वविशिष्टनिगमनत्वावच्छिन्नभेदप्रति — योगितावच्छेदकत्वं निगमनस्योपपादितमवयवग्रन्थे। यदि च केवला न्वयिग्रन्थोक्तनिष्कृष्टकल्परीत्या संशयसमुच्चययोर्वैलक्षण्यनिर्वाहाय संशये कोटिद्वयप्रकारितयोरवच्छेद्यावच्छेदकभावस्वीक्रियते, एवञ्च स्वनिरूपक तानवच्छेदकधर्मावच्छिन्ननिरूपितप्रकारितान्तरानवच्छिन्नप्रकारिताकज्ञान मेव जलत्वावच्छिन्न प्रकारकनिश्चयत्वम्, प्रकारितायां निरूपितत्वांशोपा- दानाच्च विशिष्टवैशिष्ट्यावगाहिज्ञानसङ्ग्रहः, संशयत्वं वा मानसत्वव्या प्यजातिरव्याप्यवृत्तिः, सर्वत्र संशयस्य मानसताया एवोपगमात्, चक्षु स्सन्निकर्षादिमद्धार्मिक संशयदशायां पर्वतं पश्यामीत्यनुव्यवसायश्च संशयस्य पूर्वं परतो वा जायमानतद्विषयकचाक्षुषज्ञानादिकल्पनेन तद्विषयकतयोप पादनीयः, संशत्वस्यचावच्छेदकं तद्धर्मावच्छिन्नविशेष्यकत्वावच्छिन्नतत्कोटि प्रकारकत्वमेव, तद्धर्मिविशेष्यकत्वावच्छिन्नजलप्रकारकत्वावच्छेदेन संशय त्वाभाववत्त्वमेव जलप्रकारकनिश्चयत्वम्, जातेरव्याप्यवृत्तिता मिश्रादिभिरपि स्वीकृतेति नापसिद्धान्तभीतिः; भवतु वा संशयत्वजातिर्व्याप्यवृत्तिरेव, त द्विशिष्ट निरूपितत्वं संशयीयकोटिद्वयीयविषयिताया मेवापेयते, एवञ्च संश- यत्वविशिष्टानिरूपितजलत्वावच्छिन्नप्रकारकत्वमवे जलवत्तानिश्चयत्वम्, संयशनिश्चयविषयतयोश्च भेद इत्यादिकं विभाव्यते, तदा सामानाधिकरण्य प्रकारतानिरूपितपरम्परासम्बन्धानवच्छिन्नस्वीयप्रकारतात्वव्यापकतावच्छेदक- ताकत्वस्य प्रतिबन्धकताविशेषणत्वेन सामानाधिकरण्यविषयतायाः प्रति बन्धकतानवच्छेदकत्वेऽपि क्षतिविरहात्। साध्याभाववदवृत्तिमत्पक्षविपयक

किञ्चिदवच्छिन्नविषयितात्वव्यापकावच्छेदकताकत्वनिवेशसम्भवात् । न च निश्चयनिष्ठजनकतावच्छेदिकायां विशिष्टवैशिष्ट्यावगाहिज्ञानीयपरम्परा सम्बन्धावच्छिन्नव्याप्तिप्रकारतायां प्रतिबन्धकतावच्छेदकत्वविरहेणासम्भव स्य प्रसङ्गेन व्यापकताघटितसत्प्रतिपक्षमात्रेऽव्याप्तिकथनस्यानुचितत्वाच्च । अस्माकं तु परम्परासम्बन्धानवच्छिन्नयत्किञ्चिज्ज्ञानीयप्रकारतात्वव्यापकता-वच्छेदकतात्वस्य प्रतिबन्धकत्वविशेषणत्वान्न तत्रापि दोषः ।

यत्तु व्याप्त्यंशे निश्चयत्वानिवेशप्रयुक्तलाघवस्य तुल्यतया विशिष्ट-वैशिष्ट्यावगाहिज्ञानत्वेनैव तादृशज्ञानस्य प्रतिबन्धकत्वमिति नोक्तरीत्या सम्भव इति; तन्न, विशेष्येविशेषणमिति रीत्या तदभावव्याप्यवत्ताज्ञानस्य विशृङ्खलोपस्थितिमूलकस्य प्रतिबन्धकत्वानुभवापलापापत्तेः । किञ्च प्रति बन्धकतायां विरोधितावच्छेदकरूपावगाहित्वमेव नियामकम्, न तु विलक्ष णविषयितावत्त्वमिति व्यधिकरणधर्मावच्छिन्नाभावखण्डने स्पष्टम् । जनक-तायां तु ज्ञानद्वयादिव्यावृत्तविलक्षणविषयतावत्त्वमेव नियामकं नैयायि-कानाम् । तथा च विशेष्येविशेषणमिति रीत्या ज्ञानस्यापि विरोधितावच्छे दकरूपावगाहित्वेन प्रतिबन्धकत्वं दुर्वारमिति ।

यत्तु सामानाधिकरण्यविषयितायाः प्रतिबन्धकतानवच्छेदकतया व्यापकसामानाधिकरण्यघटितसत्प्रतिपक्षाव्याप्तिवारणाय जनकतावच्छेदक मुख्यविशेष्यतात्वव्यापकतावच्छेदकताकत्वं निवेशनीयमिति; तन्न, व्याप्ति विशिष्टवैशिष्ट्यावगाहिज्ञानस्यैवानुमितिहेतुतया परम्परासम्बन्धावच्छिन्न व्याप्तिप्रकारतानिरूपितपक्षनिष्ठविशेष्यतायां जनकतावच्छेदिकायां प्रति-बन्धकतावच्छेदकत्वविरहेणासम्भवस्यैव प्रसङ्गात् । प्रतियोग्यसामानाधि-करण्यगर्भव्यभिचाराग्रहप्रतिबन्धकतावच्छेदकविषयिताशालिनिश्चयत्वेन प्र-तियोग्यसामानाधिकरण्यगर्भतदगर्भव्याप्तिनिश्चययोरेकरूपेण जनकताया व्याप्त्यनुगमसिद्धान्तलक्षणयोरुक्ततया तादृशजनकतावच्छेदकतायाः प्रति-योगिवैयधिकरण्यघटितजलव्यापकवह्न्यभावसमानाधिकरणजलवद्धदत्वा-

वच्छिन्नमुख्यविशेष्यतायां च सत्त्वेन तत्र सत्प्रतिपक्षज्ञानीयप्रतिबन्धकतावच्छेदकत्वाभावेनाव्याप्तेः । प्रतियोगिवैयधिकरण्याघटितव्यापकत्वावगाहि निश्चयस्यैव प्रतिबन्धकत्वात् । न च प्रतियोगिवैयधिकरण्यघटितव्यापकताघटितजलव्यापकवह्न्यभावसमानाधिकरणजलवत्तानिश्चयस्यापि प्रतियोगिवैयधिकरण्याघटितव्यापकतावगाहिजलव्यापकवह्न्यभावनिश्चयविशिष्टत्वेन प्रतिबन्धकतासम्भवान्नोक्ताव्याप्तिरिति वाच्यम्, यादृशजलव्यक्तिघटितोक्तप्रतियोगिवैयधिकरण्यघटितव्यापकतागर्भविशिष्टजलवद्वृद्दज्ञानं जलव्यापको वह्न्यभाव इति ज्ञानकाले न जातं तादृशजलवद्वृद्दविषयताया अपि सामान्यान्तर्गततया तादृशविषयतात्वव्यापकावच्छेदकताकत्वस्य प्रतिबन्धकतायामभावेनाव्याप्तेर्दुर्वारत्वात् । तादृशव्यक्तिरप्रामाणिकीति चेत् । प्रामाणिकत्वेपि सम्भवपक्षस्यैवादरणीयत्वात् । अस्माभिस्तूक्तरीत्या अव्याप्तिवारणाय जनकयत्किञ्चिज्ज्ञानीयविषयतात्वव्यापकावच्छेदकताकत्वं निवेश्यते , प्रतियोगिवैयधिकरण्याघटितव्यापकत्वावगाहिनिश्चयीयविषयितामादायैव लक्षणसमन्वयात् भवतां मते जनकतावच्छेदकयत्किञ्चिज्ज्ञानीयमुख्यविशेष्यतात्वव्यापकावच्छेदकताकत्वनिवेशे तूक्तोभयवद्वृद्देऽतिव्याप्तिर्दुर्वारा, तादृशजनकतावच्छेदकीभूतोभयवद्वृद्दविषयकज्ञानीयमुख्यविशेष्यकत्वव्यापकावच्छेदकताकत्वस्यतज्ज्ञानीयप्रतिबन्धकतायामक्षतत्वात्।एवमवच्छेदकावच्छेदेन परामर्शस्य पक्षतावच्छेदकव्यापकत्वविशिष्टसंयोगसम्बन्धावच्छिन्नप्रकारताशालिनिश्चयत्वेनैव जनकतया पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यताया जनकतानवच्छेदकत्वेन जनकतावच्छेदकमुख्यविशेष्यत्वाप्रसिध्यावच्छेदकावच्छेदेन सत्प्रतिपक्षाव्याप्तेश्च । अस्माकं तु जनकयत्किञ्चिज्ज्ञानीयपरम्परासम्बन्धानवच्छिन्नप्रकारतात्वव्यापकावच्छेदकत्वप्रसिध्या नाव्याप्तिः । एवं भवदुक्तविशेषणेनोक्तोभयवद्वृद्दवारणं च न सम्भवति , वह्न्यभावव्याप्यव्याप्यवह्न्यभाववान् ह्रद इति ज्ञानीयजनकतामादायोक्तविशेषणसम्भवात् । हेतुतावच्छेदकभेदेन जनकताभेदपक्षे तादृश

जनकतावच्छेदकीभूतमुख्यविशेष्यतात्वव्यापकावच्छेदकताकत्वस्य बाधप्रतिबन्धकतायां सत्वात् , अस्माकन्तु वह्न्यभावव्याप्यव्याप्यवह्न्यभाववानिति ज्ञानमादायापि नातिव्याप्तिसम्भवः । स्वीयतादृशप्रकारतात्वस्य वह्न्यभाव व्याप्तिघटकपदार्थीयप्रकारत्वादिषु सत्त्वेन तत्र प्रतिबन्धकतावच्छेदकत्व विरहात् ।

यदपि निरुक्तजनकतावच्छेदकमुख्यविशेष्यतात्वव्यापकतावच्छेदकताकत्वनिवेशनं न सम्भवति , जलव्यापकवह्न्यभावसमानाधिकरणजलवान् ह्रदः शैवालव्यापकवह्न्यभावसमानाधिकरणशैवालवान् ह्रद इत्यादिनिखिलपरामर्शसाधारण्यानुरोधेन स्वावच्छिन्नप्रकारतानिरूपितव्यापकत्वप्रकारतानिरूपितसाध्याभावत्वावच्छिन्नविषयतानिरूपितसामानाधिकरण्यविषयतानिरूपितत्वस्वावच्छिन्नत्वोभयसम्बन्धेन किञ्चिद्धर्मविशिष्टप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन उक्तसर्वनिश्चयानामेकरूपेण जनकत्व स्वीकारात् । निरुक्तजनकतावच्छेदकमुख्यविशेष्यतात्वस्य शैवालव्यापक वह्न्यभावसमानाधिकरणशैवालवद्ह्रदविषयतायां सत्त्वेन जलव्यापको वह्न्यभाव इति ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वस्याभावेन निरुक्ताऽव्याप्तिर्दुर्वारा । न च जलव्यापको वह्न्यभावः जलवांश्च ह्रदः शैवालव्यापको वह्न्यभावः शैवालवांश्च ह्रद इत्यादिसकलनिश्चयसाधारण्यानुरोधेन स्वनिरूपितव्यापकत्वनिष्ठप्रकारतानिरूपितप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यकताकत्वस्वनिरूपकनिश्चयविशिष्टत्वोभयसम्बन्धेन वह्न्यभावत्वावच्छिन्नविशेष्यताविशिष्टनिश्चयत्वेनैकप्रतिबन्धकत्वाङ्गीकारात् निरुक्तानुगतजनकतावच्छेदकविषयितात्वव्यापकत्वं निरुक्तप्रतिबन्धकतावच्छेदकतायामक्षतमिति न निरुक्तसत्प्रतिपक्षाव्याप्तिरिति वाच्यम् , तथापि निरुक्तप्रतिबन्धकतावच्छेदकतायाः वह्न्यभावत्वावच्छिन्नविशेष्यतायामेव सत्त्वेन जनकतावच्छेदकतायां ह्रदत्वावच्छिन्नविशेष्यतायामेव सत्त्वेन जनकतावच्छेदकविषयितात्वव्यापकत्वस्य प्रतिबन्धकतावच्छेदकतायामसम्भवेनोक्तसत्प्रतिपक्षाव्याप्तिर्दुर्वारेति । तन्न , नानाविधान्वय-

व्यतिरेकव्याप्तिज्ञानानां मणिमन्त्रादिन्यायेन व्यभिचारधीप्रतिबन्धकतां स्वीकृत्य व्यभिचाराग्रहप्रतिबन्धकतावच्छेदकप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वेनानुगतरूपेण जनकताया अनुमितिग्रन्थादिसिद्धतया अन्वयव्याप्तिघटितसत्प्रतिपक्षादिज्ञानजनकतावच्छेदकत्वस्य व्यतिरेकव्याप्तिघटितसत्प्रतिपक्षादिविशेष्यतायां सत्त्वेन तज्ज्ञानीयप्रतिबन्धकतावच्छेदकत्वस्याभावेनासम्भवस्य दुर्वारत्वात्। केवलान्वयिग्रन्थे मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वस्याप्रामाणिकतयोक्तानुगतरूपेण जनकत्वं दूषितमित्युक्तासम्भववारणानावश्यकतेति चेत्, व्यापकसामानाधिकरण्यज्ञानस्यापि भवदुक्तानुगतरूपेण जनकत्वं केवलान्वयिग्रन्थे दूषितमित्युक्ताव्याप्तिवारणञ्चानावश्यकमिति तुल्यम्। एवं संयोगेन साध्याभाववन्निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावविशिष्टवान् समवायेन साध्याभाववन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाभावविशिष्टवानित्यादिनानासम्बन्धावच्छिन्नप्रकारताशालिज्ञानानां स्वावच्छेदकसम्बन्धावच्छिन्नाधेयतात्वावच्छिन्नत्वस्वनिरूपिताभावविषयतानिरूपितत्वोभयसम्बन्धेन पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारताविशिष्टप्रतियोगितासम्बन्धावच्छिन्नवृत्तित्वप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताभावप्रकारतानिरूपितसाध्यप्रकारताशालिनिश्चयत्वेनानुगतरूपेण हेतुत्वस्वीकारपक्षेऽसम्भवस्यैव सम्भवेनाऽव्याप्तिशङ्काया असङ्गतिश्च। अस्तु वा यथाकथञ्चिच्छङ्का अथापि भवदुक्तरीत्यानुगतरूपेण प्रतिबन्धकत्वेऽपि जनकतावच्छेदकीभूतहृदत्वावच्छिन्नविशेष्यतायां प्रतिबन्धकतावच्छेदकत्वाभावेनाव्याप्तिरित्यसङ्गतमेव, स्वनिरूपितप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितव्यापकत्वनिष्ठप्रकारतानिरूपितवह्न्यभावत्वावच्छिन्नविशेष्यताकत्वस्वनिरूपकनिश्चयविशिष्टत्वोभयसम्बन्धेन हृदत्वावच्छिन्नविशेष्यताविशिष्टनिश्चयत्वेनाप्युक्तनिश्चयानां विनिगमनाविरहेण प्रतिबन्धकताया अवश्यकत्वेन तादृशप्रतिबन्धकता-

मादायैव लक्षणगमनसम्भवात् । उक्तरीत्या जनकयत्किञ्चिज्ज्ञानीयविषयता-त्वव्यापकावच्छेदकताकत्वनिवेशस्यावश्यकतया एकरूपेण जनकतापक्षेऽपि-निर्वाहेण तदर्थमेकरूपेण प्रतिबन्धकतानावश्यकत्वाच्च । यदपि प्रकारता-विशिष्टनिश्चयत्वेनैवानुगतरूपेण प्रतिबन्धकत्वं प्रकारतावैशिष्ट्यञ्च स्वनिरू-पितह्रदत्वावच्छिन्नविशेष्यताकनिश्चयविशिष्टत्वस्वावच्छेदकावच्छिन्नप्रकार-तानिरूपितव्यापकत्वप्रकारतानिरूपितवह्न्यभावत्वावच्छिन्नविशेष्यताकत्वो-भयसम्बन्धेन , स्वपदार्थश्चोभयत्र ह्रदत्वावच्छिन्नविशेष्यतानिरूपित—जलत्वावच्छिन्नप्रकारता , तथा चोक्तरीत्या प्रतिबन्धकत्वे पूर्वोक्त सम्बन्धद्वयेन ह्रदत्वावच्छिन्नविशेष्यताविशिष्टनिश्चयत्वेन प्रतिबन्धकतामा-दाय विनिगमनाविरहासम्भवः,ह्रदत्वावच्छिन्नत्वरूपपदार्थद्वयस्य प्रतिबन्ध-कतावच्छेदकघटकत्वेन गौरवात् । अस्माकन्तु शुद्धप्रकारतात्वेनैव प्रकार-तायाः प्रतिबन्धकतावच्छेदकत्वघटकत्वेन लाघवात् । तथा चैकरूपेण जनकतापक्षे उक्ताव्याप्तिसङ्गतिः। न च स्वनिरूपितह्रदत्वनिष्ठावच्छेदकता निरूपकनिश्चयविशिष्टत्वस्वनिरूपितप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरू-पितव्यापकत्वप्रकारतानिरूपितवह्न्यभावत्वावच्छिन्नविशेष्यताकत्वोभयसम्ब न्धेन विशेष्यताविशिष्टनिश्चयत्वेन विनिगमनाविरहेण प्रतिबन्धकत्वमावश्यक मिति नोक्ताव्याप्तिसम्भवः। विशेष्यतायाः प्रतिबन्धकतावच्छेदकत्वादिति वा-च्यम्,तथासति धर्मितावच्छेदकताप्रकारतयोरभेदमते एकत्र द्वयमिति रीत्या जलह्रदत्वोभयं धर्मितावच्छेदकीकृत्य घटप्रकारेण जलवद्ह्रदो घटवानिति निश्चयविशिष्टस्य जलव्यापको वह्न्यभाव इति निश्चयस्यापि प्रतिबन्धकत्वा पत्तेः घटप्रकारतानिरूपितजलह्रदत्वोभयावच्छिन्नविशेष्यतायास्स्वपदेनो-पादाने तादृशविशेष्यतानिरूपितह्रदत्वनिष्ठावच्छेदकतानिरूपकनिश्चयवैशि-ष्ट्यस्य प्रथमसम्बन्धस्य तादृशविशेष्यतानिरूपितजलत्वावच्छिन्नधर्मिता वच्छेदकत्वात्मकप्रकारतामादाय द्वितीयसम्बन्धस्य च सम्भवात् । प्रकार ताविशिष्टनिश्चयत्वेन प्रतिबन्धकतामते च स्वनिरूप्यतावच्छेद कह्रदत्वावच्छे-द्यत्वाश्रयविशेष्यतानिरूपकनिश्चयवैशिष्ट्यस्य प्रथमसम्बन्धत्वान्न दोषः ,

तादृशोभयावच्छिन्नविशेष्यकज्ञाने तादृशोभयावच्छिन्नविशेष्यतात्वघटत्वावच्छिन्नप्रकारतात्वाभ्यां निरूप्यनिरूपकभावेऽपि ह्रदत्वावच्छिन्नविशेष्यतात्वजलप्रकारतात्वाभ्यां तद्विरहादिति ; तन्न , स्वनिष्ठह्रदत्वावच्छेद्यत्वावच्छिन्ननिरूप्यताकप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितव्यापकत्व—प्रकारतानिरूपितवह्न्यभावत्वावच्छिन्नविशेष्यताकत्वस्वनिरूपकनिश्चयविशिष्टत्वोभयसम्बन्धेन विशेष्यताविशिष्टनिश्चयत्वेनापि प्रतिबन्धकताया निर्दुष्टतया विनिगमनाविरहसिद्धां तादृशप्रतिबन्धकतामादायैव लक्षणसमन्वय—सम्भवेन उक्तव्याप्यसङ्गतेर्दुर्वारत्वात् । न च घटवद्ह्रदवज्जलवान् घट इत्यादिज्ञानविशिष्टस्य जलव्यापको वह्न्यभाव इति ज्ञानस्य प्रतिबन्धकत्वापत्तिः । अन्तरा भासमानविशेष्यताप्रकारतयोरभेदमते उक्तज्ञानस्यापि ह्रदत्वावच्छेद्यत्वावच्छिन्ननिरूप्यताकजलत्वावच्छिन्नप्रकारताकत्वात् । अतः ह्रदत्वावच्छेद्यत्वविशेष्यतात्वोभयावच्छिन्ननिरूप्यताकत्वेन प्रकारता निवेशनीया, तथा च विशेष्यताविशिष्टनिश्चयत्वेन प्रतिबन्धकतामते विशेष्यतात्वस्य संसर्गघटकतया प्रकारघटकतया च द्विधा निवेशनमावश्यकमिति गौरवमिति वाच्यम्;स्वनिरूप्यतावच्छेदकह्रदत्वावच्छेद्यत्वविशेष्यतात्वोभयाश्रयनिरूपकनिश्चयविशिष्टत्वेन प्रकारताविशिष्टत्वेन प्रतिबन्धकता—वादिमते निश्चयस्य संसर्गघटकतावद्विशेष्यताविशिष्टत्वेन प्रतिबन्धकतावादिमते स्वनिष्ठह्रदत्वावच्छेद्यत्वविशेष्यतात्वोभयावच्छिन्ननिरूप्यताकत्वेन प्रकारतानिवेशेन प्रकारतात्वेन तदनिवेशेन साम्यात् । न चैवं जलवान् ह्रद इति निश्चयविशिष्टस्य संयोगव्यापको वह्न्यभाव इति निश्चयस्य प्रतिबन्धकत्वापत्तिः , संयोगनिष्ठसंसर्गताया अप्युक्तनिरूप्यताकत्वादिति वाच्यम् , सम्बन्धान्तरावच्छिन्नप्रकारताव्यावर्तकसंयोगावच्छिन्नत्वनिवेशावश्यकतया तत एव संसर्गताव्यावृत्तेः , प्रकारतात्वानिवेशात् । संसर्गताया निरवच्छिन्नत्वेन तदवच्छेदकाप्रसिद्धेश्च । तथा च साम्याद्विनिगमनाविरहो दुर्वार इति । प्रकारकोटौ सम्बन्धावच्छिन्नत्वेन प्रकारतान्निवेश्य प्रकारतात्वानिवेशेऽपि प्रकारकोटावाधिक्याद्गौरवं स्फुटमितिबोध्यम् ।

यत्तु तादृशमुख्यविशेष्यतात्वव्यापकतावच्छेदकताकत्वनिवेशे जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्ध्रदेऽतिव्याप्तिर्दुर्वारा । जलव्यापको वह्न्यभावः जलवान् ह्रद इति वह्न्यभावव्याप्यव्याप्यव्यापको वह्न्यभावः वह्न्यभावव्याप्यव्याप्यवांश्च ह्रदइत्युभयोरेकरूपेण प्रतिबन्धकत्वाङ्गीकारात् , निरुक्तज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकतायास्तादृशजनकतावच्छेदकीभूतप्रत्येकज्ञानीयविषयतायामपि सत्त्वेन निरुक्तजनकतावच्छेदकविषयितात्वव्यापकावच्छेदकताकत्वस्य उक्तज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायां सत्त्वादिति ; तन्न , उक्तजनकतावच्छेदकताया वह्न्यभावव्याप्यव्याप्याव्यापकवह्न्यभावकालीनवह्न्यभावव्याप्यव्याप्यवद्ध्रदत्वावच्छिन्नविषयतायामपि सत्त्वेन तत्रोक्तप्रतिबन्धकतावच्छेदकत्वाभावात् , तादृशज्ञानीयविषयितायां वह्न्यभावव्याप्यव्याप्यव्यापको वह्न्यभाव इति ज्ञानकालीनज्ञानीयत्वासम्भवेन उक्तप्रतिबन्धकतावच्छेदकत्वासम्भवात् । वह्न्यभावव्याप्यत्वावच्छिन्नविधेयताकानुमितिजनकतावच्छेदकतायास्तत्राक्षतत्वात् । नच वह्न्यभावव्याप्यव्याप्याव्यापकत्वांशेऽप्रामाण्यज्ञानास्कन्दितस्य तादृशनिश्चयस्योत्तरं वह्न्यभावव्याप्यव्याप्यव्यापको वह्न्यभाव इति ज्ञानस्योत्पत्तौ बाधकाभावेन तादृशनिश्चयस्यापि निश्चयविशिष्टत्वेन प्रतिबन्धकनिश्चयत्वसम्भवात् । तादृशज्ञानीयविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वं सम्भवतीत्युक्तविशिष्टेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् , अप्रामाण्याभाववज्ज्ञानसामान्यकालीनत्वं निष्प्रकारत्ववज्ज्ञानसामान्यकालीनत्वं वा वह्न्यभावव्याप्यव्याप्याव्यापकवह्न्यभावकालीनवह्न्यभावव्याप्यव्याप्यांशेऽवगाहमानज्ञानीयविशेष्यतायां प्रतिबन्धकतावच्छेदकत्वासम्भवेनातिव्याप्त्यप्रसक्तेः । तादृज्ञानीयविशेष्यताया अप्रामाण्यज्ञानास्कन्दितज्ञानीयत्वासम्भवात् । पूर्वमप्रामाण्यज्ञानस्वीकारे ज्ञानत्वावच्छेदेन निष्प्रकारत्वावगाहितादृशज्ञानस्यैवासम्भवात् । तादृशज्ञानोत्तरमपि तादृशज्ञानरूपप्रतिबन्धकबलादेव अप्रामाण्यज्ञानासम्भवात् । नच तादृशज्ञानस्य ज्ञानसामान्ये निष्प्रकारकत्वावगाहित्वेऽपि तस्य पूर्वं परतो वा प्रमात्वाभावरूपाप्रामाण्यावगाहिज्ञान-

सम्भवतीति वाच्यम् , प्रतियोगित्वस्वरूपान्यतरसम्बन्धावच्छिन्नवृत्तित्वाभाववत्प्रकारकत्वकालीनत्वावगाहितादृशज्ञानीयविशेष्यताया एवमपि प्रतिबन्धकतावच्छेदकत्वासम्भवनातिव्याप्तेरप्रसक्तेः । प्रकारितात्वावच्छेदेनोक्तान्यतरसम्बन्धावच्छिन्नवृत्तित्वाभावावगाहिज्ञानस्यैव स्वरूपसम्बन्धेन प्रतियोगितासम्बन्धेन वा प्रकारित्वप्रकारकज्ञाने प्रतिबन्धकतया उक्तज्ञानोत्तरं प्रतियोगितासम्बन्धेन प्रकारित्वप्रकारकस्य प्रमात्वाभावावगाहिज्ञानस्य भ्रमत्वावगाहिज्ञानस्य चासम्भवात् ।

अथ सप्रकारकज्ञानकालीनजलस्यैव प्रतिहेतुत्वे सप्रकारकज्ञानकालीनजलव्यापकवह्न्यभावव्याप्यसमानाधिकरणतादृशजलजलव्यापकवह्न्यभावकालीनजलोभयवद्भेदेऽतिव्याप्तिः । तादृशवह्न्यभावव्याप्यव्याप्यवत्तादृशज्ञानस्य ज्ञानत्वावच्छेदेन निष्प्रकारत्वावगाहित्वासम्भवेनाप्रामाण्यज्ञानास्कन्दिततादृशज्ञानमादायातिव्याप्तिसङ्गतिरिति चेन्न । एकरूपेण जनकतामते वह्न्यभावव्याप्यव्याप्यशुद्धजलवत्ताज्ञानस्यापि जनकत्वेन वह्न्यभावव्याप्यव्याप्याव्यापकवह्न्यभावकालीनत्वं उक्तप्रकारकत्वाभाववत्तादृशज्ञानसामान्यकालीनत्वं चावगाह्यमानज्ञानीयविषयितायां जनकतावच्छेदिकायां प्रतिबन्धकतावच्छेदकत्वाभावेनातिव्याप्त्यप्रसक्तेः । पक्षतावच्छेदककोटौ सप्रकारकज्ञानकालीनकस्य घटकत्वे तादृशपक्षतावच्छेदकस्थले कथञ्चिदतिव्याप्तिसम्भवेऽपि शुद्धह्रदपक्षकस्थलेऽतिव्याप्त्यप्रसक्तिरेव । नच वह्न्यभावव्याप्यव्याप्याव्यापकत्वांशे संशयरूपस्योक्तज्ञानस्यानन्तरं वह्न्यभाव व्याप्यव्याप्यव्यापको वह्न्यभाव इति ज्ञानसम्भवात् । निश्चयात्मक तादृशज्ञानविशेष्यताया अपि प्रतिबन्धकतावच्छेदकत्वसम्भवः , संशयनिश्चयविषयितयोरभेदादिति वाच्यम् ; उक्तान्यतरसम्बन्धावच्छिन्नवृत्तित्वाभाववत्प्रकारितासामान्यकालीनवह्न्यभावव्याप्यव्याप्याव्यापकवह्न्यभाव-

कालीनवह्न्यभावव्याप्यव्याप्यवद्धदो घटवानिति ज्ञानस्य वह्न्यभावव्याप्य व्याप्याव्यापकत्वांशे संशयत्वायोगात् , धर्मितावच्छेदकांशे संशयत्वा- नभ्युपगमात् । अतएव जगदीशेनोक्तं बाधग्रन्थे वस्तुतो यत्र पक्षा- पेक्षया साध्याभावो लघुः तत्र तत्प्रकारक एव बाधनिश्चयो विरोधी, यथा चैत्रावलोकितह्रदो वह्निमानित्यादौ , तत्प्रकारकनिश्चयत्वापेक्षया साध्याभावप्रकारकनिश्चयत्वस्यैव लघुत्वेन साध्यवत्ताज्ञानप्रतिबन्धकता- वच्छेदकत्वात् , यत्र साध्याभावापेक्षया पक्ष एव लघुः तत्र साध्या- भावधर्मिकपक्षप्रकारकनिश्चय एव विरोधी , यथा ह्रदश्चैत्रावलोकितवह्नि- मानित्यादौ यत्र पक्षस्साध्याभावश्च द्वयमेव तुल्यशरीरं तत्र साध्याभाव- प्रकारकस्येव पक्षप्रकारस्यापि बाधनिश्चयस्य विरोधित्वं , यथा घटा- भावो वह्निमानित्यादाविति तु परमार्थ इति । तथा चोक्तज्ञानीयविशे- ष्यतायां जनकतावच्छेदिकायां प्रतिबन्धकतावच्छेदकत्वाभावात् । न जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्धदेऽतिव्या- प्तिरिति ।

किञ्च जलव्यापको वह्न्यभावः जलवांश्च ह्रदः वह्न्यभावव्याप्य- व्याप्यव्यापको वह्न्यभावः वह्न्यभावव्याप्यव्याप्यवांश्च ह्रद इत्यादिज्ञाना- नामेकरूपेण प्रतिबन्धकत्वाङ्गीकारोऽपि नोचितः , जातिमद्व्यापको वह्न्य- भावः जलवांश्च ह्रदः जलव्यापको वह्न्यभावः जातिमद्वांश्च ह्रद इति ज्ञानद्वयस्य प्रतिबन्धकत्ववारणाय स्वनिरूपितव्यापकत्वप्रकारतानिरूपित- प्रकारतानिरूपितनिरवच्छिन्नावच्छेदकतासमानाधिकरणनिरवच्छिन्नाव- च्छेदकताकप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताकत्वस्वनिरूपकनिश्चय विशिष्टत्वोभयसम्बन्धेन वह्न्यभावत्वावच्छिन्नविशेष्यताविशिष्टनिश्चयत्वेन प्रतिबन्धकताया आवश्यकतया अविशेषितधर्मावच्छिन्ननिरूपितव्यापक त्वावगाहिनिश्चयविशिष्टनिश्चयकिञ्चिद्विशेषितधर्मावच्छिन्नव्यापकत्वावगाहि-

निश्चयविशिष्टनिश्चययोरेकरूपेण प्रतिबन्धकत्वासम्भवात् । अतएवैकरूपेण जनकतामतेऽपि वह्निव्याप्यधूमवान् वह्निव्याप्यजातिमद्वानित्यादिज्ञानानां पृथगेव हेतुत्वमुक्तं नव्यमतवादार्थे । वह्निव्यापकीभूताभावप्रतियोगिजलं जलवान् ह्रदः वह्निव्यापकीभूताभावप्रतियोगिजातिमज्जातिमद्वान् ह्रद इत्यादिज्ञानानामनुगतरूपेण प्रतिबन्धकतापक्षेऽपि पृथगेव प्रतिबन्धकत्वमुक्तं चन्द्रनारायणीये । अपि चोभयवद्धूदेऽतिव्याप्तिशङ्कैव नोचिता, जलव्यापकवह्न्यभावकालीनजलवद्धूदस्यापि विरोधस्य साक्षादनुमितिप्रतिबन्धकहेत्वाभासत्वपक्षे सामानाधिकरण्यविषयितायाव्याप्तिशरीरेऽनिवेशेन विरोध्युन्नायकत्वसम्भवेन सत्प्रतिपक्षरूपताया दुर्वारत्वात् । एतदेवोक्तं सिद्धान्तलक्षणे गादाधर्याम् वस्तुतस्तु विरुद्धत्वेन ज्ञायमानधर्मवत्ताज्ञानस्यानुमितावेव प्रतिबन्धकताया वक्ष्यमाणतया साध्यसामानाधिकरण्यशरीरेऽपि सम्बन्धविशेषानिवेशेऽपि न क्षतिः, सामानाधिकरण्यविषयितायाः प्रयोजकत्वं विशिष्टपरामर्शनिर्वाहाय उपेयत" इत्यादिना । कृष्णभट्टैरपि जलव्यापकवह्न्यभावकालीनजलवद्धूदादिव्यावृत्तिरशक्या स्यादिति सामान्यनिरुक्तिप्रतीकमुपादाय व्याख्यातम्- "तस्योदासीनविषयितानिरूपकपदार्थघटितत्वाविशेषेण व्याप्तौ सम्बन्धसासामान्यगर्भसामानाधिकरण्यनिवेशपक्षे साध्याभावोन्नायकत्वाविशेषेण च लक्ष्यत्वापात इत्यर्थ" इत्यादिना । तथा चोक्तविशिष्टेऽतिव्याप्तिशङ्काया मेयत्वविशिष्टसत्प्रतिपक्षातिव्याप्तिशङ्कातुल्यत्वान्न युक्तेति ।

एतेनोक्तरीत्या यत्किञ्चिज्ज्ञानीयविषयितात्वव्यापकावच्छेदकतात्वनिवेशस्यावश्यकतया केवलवह्न्यभावव्याप्यव्याप्यवान् ह्रद इति ज्ञानीयविषयितात्वव्यापकावच्छेदकताकत्वस्य प्रतिबन्धकतायां सत्त्वात् । जलव्यापकेत्याद्युक्तोभयवद्धूदेऽतिव्याप्तिर्दुर्वारेति निरस्तमिति कृतं पल्लवितेनेति वदन्ति ।

अपरे तु-जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्याभाव-यवद्धूदेऽतिव्याप्तिवारणाय यद्रूपावच्छिन्नविषयिताया प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयतानिरूपितवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वं निवेश्यते, वैशिष्ट्यञ्च - निरूपितत्वतादात्म्यान्यतरसम्बन्धेन । निरुक्तोभयवद्धूदविषयितायां च निरुक्तोभयसत्त्वान्नातिव्याप्तिः ।

ननूक्तविवक्षणं न सम्भवति, प्रतिहेतुत्वस्यानुगतस्यासम्भवेन जलोपादाने शैवालादिघटितसत्प्रतिपक्षेऽव्याप्तेः ; प्रकृतहेतुभिन्नत्वस्यानुगतत्वेऽपि प्रकृतहेतोरेव अन्यरूपेण प्रतिहेतुत्वे तद्घटितसत्प्रतिपक्षाव्याप्तेः ; प्रकृतहेतुव्यापकसाध्याभावसमानाधिकरणप्रकृतहेतुमत्पक्षस्यापि सत्प्रतिपक्षतापक्षे तत्राव्याप्तिश्च, लाघवेनैतत्काञ्चनमयत्वादिभानस्थले काञ्चनमयत्वाभावव्याप्यतद्व्यक्तित्ववद्धूदादौ चाव्याप्तिः । एवं गुणीयसंयोगेन वह्निसाध्यके गुणीयतत्साभाववत्संयोगस्य बाधतायास्तद्व्याप्यत्वसंयोगस्य सत्प्रतिपक्षतायाश्च जगदीशेनोक्तत्वेन तत्राव्याप्तिश्च, आधेयतासम्बन्धेन पक्षव्याप्यवत्साध्याभावपक्षवृत्तित्वव्याप्यवत्साध्याभावपक्षावृत्तित्वव्याप्यवत्साध्यादावव्याप्तिश्च । अथ स्वावच्छिन्नविषयितानिरूपितव्यापकत्वविषयतानिरूपितविषयतानिरूपितसामानाधिकरण्यविषयितानिरूपितत्वस्वावच्छिन्नत्वोभयसम्बन्धेन किञ्चिद्धूदेवृत्तिविशिष्टविषयितावैशिष्ट्यान्यत्वमेव प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयतावैशिष्ट्यान्यत्वम्, तथा च व्यापकसामानाधिकरण्यघटितविशिष्टमात्रस्य सङ्ग्रहान्नोक्तव्याप्तयः । न च जलव्यापकशैवालसमानाधिकरणजलस्यैव प्रतिहेतुत्वे जलव्यापकशैवालसमानाधिकरणजलव्यापकवह्न्यभावकालीनतादृशजलवह्न्यभावव्याप्यव्याप्याभाववद्धूदेऽतिव्याप्तिः, तादृशोभयवद्धूदविषयतायामुक्तविशिष्टान्यत्वाभावेन उक्तोभयाभावसम्भवात् । एवं जलव्यापकशै-

व्याप्यसमानाधिकरणजलं वह्निसहितत्वात् जलव्यापकवह्न्यभावकालीनजलवह्न्य-
भावव्याप्यव्यापकोभयसम्बन्धावच्छिन्नजलवृत्तिकार्यतानिरूपितजलत्वावच्छिन्ने-
ऽतिव्याप्तिरिति वाच्यम्, स्वावच्छेदकत्वस्य स्वसमानाधिकरणस्वनिष्ठधर्मि-
तावच्छेदकत्वनिवेशकरणत्वधर्मनिरूपितत्व द्वितीयसम्बन्धस्यैवाभावस्थले ता-
दृशवह्न्यभावकालीनत्वनिवेशकरणेऽपि विशेषाभावात् जलत्वशैवाल-
सामानाधिकरण्यसम्बन्धेन द्वितीयस्थले च जलव्यापकवह्न्यभाव-
कालीनजलवह्न्यभावव्याप्यव्यापकोभयसम्बन्धनिष्ठप्रकारतानिरूपितविशेष्यतायाः उ-
क्तोभयसम्बन्धावच्छेदकेन जलेऽतिव्याप्तेरवच्छेदकत्वात्। यद्यपि जलव्या-
पकशैवलसमानाधिकरणोद्भिदप्रकारतानिरूपितविशेष्यतायाः जलव्यधिकरणधर्मितावच्छेद-
कताकविशेष्यता उभयसम्बन्धास्ति, तथापि तादृशस्थले तादृशविषयता-
निरूपितत्वं न यद्रूपावच्छिन्नविषयितानिरूपितत्वम्, यत्र द्वितीयविशेष्यतायाः
कालीनत्वप्रकारतानिरूपितत्वेऽपि तादृशविशेष्यतायाः जलत्वोभयसम्बन्धावच्छिन्नविशे-
ष्यतात्मकप्रकारतानिरूपितत्वात्, द्वितीयस्थले च तादृशविशेष्यतायाः
यद्रूपावच्छिन्नविषयितानिरूपितत्वादिति चेत्? तर्हि जलव्यापकवह्न्यभाव-
व्याप्यसमानाधिकरणजलजलव्यापकवह्न्यभावकालीनजलोभयसम्बन्धावच्छेदकतया
निर्दुर्वारा तद्रूपावच्छिन्नविषयितायाः व्यधिकरणधर्मिविशिष्टजलादि-
विषयितानिरूपितत्वेनोक्तोभयाभावात्। यदि च तादृशविषयितावै-
शिष्ट्यं तादात्म्यस्वभावनिरूपितत्वान्यतरसम्बन्धेनेति नोक्तोभयसम्बन्धावच्छेदवि-
षयितानिरूपितत्वाभावत्वमित्युच्यते, तथापि वह्निव्यापकीभूताभाव-
प्रतियोगिप्रतिहेतुपरत्वे पक्षतावच्छेदकीभूताभावप्रतियोगिधर्म-
वत्साध्याभावादौ चाव्याप्तिः, किञ्चित्तादृशविषयितानिरूपितव्यापक-
त्वविषयितानिरूपिताभावनिष्ठप्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नत्वविषयितानिरूपित-
किञ्चिद्धर्मपर्याप्यवृत्तिधर्मितावच्छेदकतावच्छिन्नविशेष्यतात्वघटितत्वाव—
च्छिन्नाभावविवक्षणेनोक्तदोषपरिहारेऽपि अत्यन्ताभावस्याव्यापकत्वोपादानेऽ-
न्योन्याभावस्यानव्यापकत्वघटितलक्षणसमन्वयाभावात्। निवेश्य, उक्तलक्ष-

र्तिपक्षेष्वव्याप्तिवारणाय प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयतावैशिष्ट्यान्यत्वज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वं साध्याभावत्वावच्छिन्नविषयितावैशिष्ट्यान्यत्वरूपं परिष्कर्तव्यम् , साध्याभावत्वावच्छिन्नविषयतावैशिष्ट्यम्-स्वविशिष्टविषयिताविशिष्टत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदत्वस्वनिष्ठावच्छेदकताकप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन । विषयितायां स्ववैशिष्ट्यं च स्वनिरूपितव्यापकत्वप्रकारतानिरूपितप्रकारतावच्छेदकावच्छिन्नत्वस्वनिरूपितसामानाधिकरण्यप्रकारतानिरूपितत्वोभयसम्बन्धेन । विषयितावैशिष्ट्यं च स्वनिरूपितत्वतादात्म्यान्यतरसम्बन्धेन । द्वितीयसम्बन्धप्रविष्टस्वनिष्ठप्रतिबन्धकतावच्छेदकता स्वनिरूपितव्यापकत्वप्रकारतानिरूपितप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वस्वनिरूपकनिश्चयविशिष्टत्वोभयसम्बन्धावच्छिन्ना, तथा च नोक्तसत्प्रतिपक्षेऽव्याप्तिः । किञ्चिद्व्यापकसाध्याभावसामानाधिकरण्यघटितसत्प्रतिपक्षविषयतायां प्रतिहेतुव्यापकसाध्याभावसामानाधिकरण्यविषयितानिरूपितप्रतिहेतुविषयितावैशिष्ट्यरूपप्रथमसम्बन्धाभावेन किञ्चिद्व्यापकाञ्जनमयत्वाभावादिघटितसत्प्रतिपक्षविषयतायां च तादृशसाध्याभावविषयकत्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वरूपद्वितीयसम्बन्धाभावेनोक्तसत्प्रतिपक्षविषयितानां निरुक्तसम्बन्धद्वयेन साध्याभावत्वावच्छिन्नविषयितावैशिष्ट्यान्यत्वात् । जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्ह्रदे च नातिव्याप्तिः तद्विषयतायाः प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयतावैशिष्ट्यान्यत्वेन तादृशसाध्याभावविषयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकत्वेन चोक्तोभयसम्बन्धेन साध्यभावत्वावच्छिन्नविषयतावैशिष्ट्येन तदन्यत्वाभावात् । न चैवं प्रतिहेतुतावच्छेदकघटितसाध्याभावाभाववदवृत्तिमत्पक्षेऽतिव्याप्तिः , वह्न्यभावाभाववदवृत्तिजलं जलवान् ह्रद इति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया तादृशविशिष्टविषयतायां उक्त-

ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वघटितोभयसम्बन्धेन साध्याभावाविषयताविशिष्टान्यत्वाद्यनपायादिति वाच्यम् , वक्ष्यमाणरीत्या विशिष्टान्तराघटितत्वेन तस्य वारणीयत्वात् , अथवा पूर्वपक्षोक्तरीत्या यद्रूपावच्छिन्नविषयतायां त्रित्वावच्छिन्नाभाववैवक्षणमेव युक्तम् । न चैवं अत्यन्ताभावगर्भव्यापकत्वोपादाने अन्योन्याभावगर्भव्यापकत्वघटितसत्प्रतिपक्षाव्याप्तिरिति वाच्यम् , सत्प्रतिपक्षो हि अत्यन्ताभावगर्भव्यापकताघटित एव,नत्वन्योन्याभावगर्भव्यापकताघटितोऽपि, तस्य विरोध्युन्नायकत्वेऽपि प्रतियोगिवैयधिकरण्यगर्भव्यापकताघटितरूपसमशीलत्वेन प्रकृतानुमितिविरोधित्वाभावात् । प्रतियोगिवैयधिकरण्यगर्भभेदगर्भव्यापकत्वयोः विशेषाभावात् । एतेनोक्तउभयसम्बन्धेन साध्याभावत्वावच्छिन्नविषयताविशिष्टान्यत्वं यद्रूपावच्छिन्नविषयतायान्निवेश्य उक्ताव्याप्त्यतिव्याप्त्योर्वारणेऽपि तद्व्यक्तित्वव्यापकपक्षवृत्तित्वकालीनतद्व्यक्तित्वपक्षवृत्तित्वव्याप्य—व्याप्योभयवत्साध्याभावादावतिव्याप्तिः ।

एवमुपनीतकाञ्चनमयत्वादिभानस्थले तद्व्यक्तित्वव्यापककाञ्चनमयत्वाभावकालीनतद्व्यक्तित्व काञ्चनमयत्वाभावव्याप्यव्याप्योभयवद्ह्रदादावतिव्याप्तिर्दुर्वारैवेति निरस्तम् , उक्तत्रित्वावच्छिन्नाभावस्य उक्तविशिष्टविषयितायामभावेनोक्तातिव्याप्तिविरहात् । वस्तुतस्तु प्रतिहेतुव्यापकसाध्याभावादिघटितसत्प्रतिपक्षविषयिताः ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताव्याप्यजनकतावच्छेदकत्वेनानुगमय्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वतद्व्याप्यजनकतावच्छेदकविषयताभिन्नत्वोभयाभाववत्वमेवोक्तविशेषणेन विवक्षितम् , स्वव्याप्यजनकतावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वस्वावच्छेदकत्वोभयसम्बन्धेन ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताविशिष्टान्यत्वं तादृशविषयितायां विशेषणमिति पर्यवसितम् । तथा च न काप्यव्याप्तिः । सत्प्रतिपक्षविषयिता—सामान्यस्योक्तोभयसम्बन्धेन ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताविशिष्टत्वाभावेन तदन्यत्वात् । उक्तोभयवद्ह्रदे च नातिव्याप्तिः , तद्विषयितायां उक्तोभयसम्बन्धेन प्रतिबन्धकताविशिष्टत्वेन तदन्यत्वाभावात् - एतेन यद्रूपावच्छिन्नविषयितायां प्रतिहेतुव्यापकसाध्याभावसमानाधिकरण-

प्रतिहेतुविषयितावच्छेदकत्वोभयाभावनिवेशे साध्याभावाभाववदवृत्तिमत्पक्षरूपसत्प्रतिपक्षाव्याप्तिः; ह्रदो वह्निधूमोभयवानित्यादौ वह्न्यभावाभाववदवृत्तिव्यापको धूमाभावः वह्न्यभावाभाववदवृत्तिमांश्च पक्ष इति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया वह्न्यभावाभाववदवृत्तिमद्ह्रदविषयितायां निरुक्तोभयाभावासत्वात् । न चोभयाभावप्रतियोगिकोटावनतिरिक्तवृत्तित्वरूपावच्छेदकस्यैव निवेशान्नोक्ताव्याप्तिः, प्रत्येकज्ञानीयवह्न्यभावाभाववदवृत्तिमद्ह्रदविषयिताया उक्तप्रतिबन्धकतातिरिक्तवृत्तित्वेन उक्तोभयाभाववत्वस्याक्षतत्वात्, जलव्यापकेत्याद्युक्तोभयवद्ह्रदे च नातिव्याप्तिः, तद्विषयितायां निरुक्तप्रतिबन्धकतानतिरिक्तवृत्तित्वस्य निरुक्तविषयितावैशिष्ट्यान्यत्वस्य च द्वयोरेव सत्त्वेनोक्तोभयाभाववत्त्वस्य चाभावात् इति वाच्यम्, अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वसाध्यकघटादिपक्षकस्थले समवायसम्बन्धस्य व्याप्यतावटत्वे अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वाभावाभाववदवृत्तिमद्घटरूपसत्प्रतिपक्षेऽव्याप्तिः, तत्र ह्यभावविशिष्टव्यापकस्सामान्यत्वाभावः अभावविशिष्टावांश्च ह्रद इति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया निरुक्तसत्प्रतिपक्षविषयितायानिरुक्तप्रतिबन्धकतानतिरिक्तवृत्तित्वनिरुक्तविषयितावैशिष्ट्यान्यत्वोभयवत्वादिति निरस्तम्, अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वाभावाभाववदवृत्तिमत्पक्षरूपसत्प्रतिपक्षविषयितायां ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वसत्त्वेऽपि तद्व्याप्यजनकतावच्छेदकविषयताभिन्नत्वाभावेनोक्तोभयाभाववत्वस्य उक्तसम्बन्धद्वयेन प्रतिबन्धकताविशिष्टान्यत्वपर्यवसितस्याक्षतत्वेन तत्राव्याप्तिविरहात् । प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुविषयित्वानिरूपकत्वतादृशसाध्याभावविषयितानिष्ठपूर्वोक्तसम्बन्धद्वयावच्छिन्नावच्छेदकताकप्रतिबन्धकतावच्छेदकत्वोभयाभाववत्त्वस्य स्वनिष्ठोक्तोभयसम्बन्धावच्छिन्नावच्छेदकत्व-

प्रतिबन्धकतावच्छेदकत्वस्वविशिष्टविषयितानिरूपकत्वसम्बन्धावच्छिन्नस्व-निष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वोभयसम्बन्धेन साध्याभावविषयतावि-शिष्टान्यत्वपर्यवसितस्य यद्रूपावच्छिन्नविषयकनिश्चये निवेशे दोषाभावाच्च । तथाहि जलव्यापकेत्याद्युक्तोभयवह्नदे नातिव्याप्तिः , तादृशविशिष्टविषयकनिश्चयस्य जलव्यापकवह्न्यभावसमानाधिकरणजलवह्नदविषयत्वानिरूपकत्वेन तज्ज्ञानीयप्रतिबन्धकतायाः जलव्यापकवह्न्यभावविषयकनिश्चयावच्छिन्नतया तादृशप्रतिबन्धकतावच्छेदकत्वाच्चोक्तोभयाभाववत्त्वस्य तादृशनिश्चयेऽभावात्। साध्याभाववदवृत्तिमत्पक्षे च नोक्तरीत्याव्याप्तिः ,वह्न्यभावाभाववदवृत्तिव्यापको धूमाभाव इति निश्चयीयधूमाभावविषयत्वनिष्ठपूर्वोक्तसम्बन्धावच्छिन्नावच्छेदकताकप्रतिबन्धकतावच्छेदकत्वस्य वह्न्यभावाभाववदवृत्तिव्यापको धूमाभाव इति निश्चये सत्त्वेऽपि वह्न्यभावाभाववद्वृत्तिमान् ह्रद इति निश्चये अभावेन तादृशनिश्चयस्योक्तोभयाभाववत्त्वात्तादृशनिश्चयमद्यैव लक्षणसमन्वयात् । अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वसाध्यकस्थलीयसत्प्रतिपक्षेऽपि नाव्याप्तिः , अभावविशिष्टव्यापकत्वसामान्यत्वाभावः — उत्तरज्ञानं अभावविशिष्टव्यापकत्वांशेऽप्रमेति समूहालम्बनोत्तरकालीनतादृशसत्प्रतिपक्षनिश्चयमादायैव लक्षणसमन्वयात् । तत्र तादृशसत्प्रतिपक्षनिश्चयस्य स्वात्मकनिश्चयविशिष्टत्वेन न प्रतिबन्धकता, तस्याभावविशिष्टव्यापकत्वांशे अप्रामाण्यज्ञानानास्कन्दितत्वविरहात् । किन्त्वप्रामाण्यज्ञानात्मकपूर्वनिश्चयविशिष्टत्वेनैवेति तादृशनिश्चयेऽभावविशिष्टव्यापकसामान्यत्वाभावविषयितानिष्ठोक्तसम्बन्धावच्छिन्नावच्छेदकताकप्रतिबन्धकतावच्छेदकत्वाभावेनोक्तोभयाभावसत्त्वात् । अप्रामाण्यज्ञानानास्कन्दितत्वशरीरे च तद्व्यक्तिभिन्नाप्रामाण्यज्ञानानास्कन्दितत्वस्यैव निवेशेन तादृशाप्रामाण्यज्ञानास्कन्दितनिश्चयस्यापि लक्षणघटकत्वानपायात् , अप्रामाण्यज्ञानाभावस्य पृथग्धेतुतामते तादृशनिश्चयस्य जनकत्वाच्च । किञ्च यथाश्रुतेऽपि न तत्राव्याप्तिः , तदभाववदवृत्तित्वरूपव्याप्तिशरीरवृत्तित्वाभावस्याभावत्वेनानिवेशात् , अनुयोगितावि शेषसम्बन्धेन वृत्तित्वीयत्वेनैव निवे-

शात् साध्यीयत्वेन साध्याभावनिवेशनवत् , तथा च तादृशसाध्याभावाभाववन्निरूपितवृत्तित्वीयवद्वानिति ज्ञानसाधारण्यनुरोधेन ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकत्वावश्यकत्वात् , तादृशसत्प्रतिपक्षविषयित्वस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतातिरिक्तवृत्तित्वेनोक्तोभयाभावस्याक्षतत्वात् । अपि चात्र केवलसामान्यत्वाभावाभाववदवृत्तिमत्पक्षस्यैव सत्प्रतिपक्षत्वं गदाधरानुमतम् , न तूक्तविशिष्टसाध्याभावाभाववदवृत्तिमत्पक्षस्य , तादृशसत्प्रतिपक्षज्ञानस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिराकरणाय हेतुतावच्छेदकघटनामसहमानस्य उक्तस्थले साध्यतावच्छेदकघटनायां ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतासम्पादिकायां अभ्युपगमासम्भवात् । अन्यथा सामान्यलक्षणे ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशे उक्तसत्प्रतिपक्षाव्याप्तिसम्भवेन तामुपेक्ष्य असाधारण्याव्याप्तिपर्यन्तानुधावनवैफल्यापत्तेः । एतेन वृत्तित्वीयविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वसाध्यकतादृशसत्प्रतिपक्षाव्याप्तिः , वृत्तित्वीयविशिष्टव्यापकसामान्यत्वाभावः—वृत्तित्वीयविशिष्टवांश्च घट इति ज्ञानसाधारणज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानातिरिक्तवृत्तित्वस्य वृत्तित्वीयविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्वाभावाभाववदवृत्तिमद्घटविषयतायामक्षतत्वादिति निरस्तमित्याहुः ।

परेतु विरोध्यनुमितिनिरूपितयत्किञ्चिज्जनकताव्यापकत्वं सत्यन्तघटकप्रतिबन्धकतायां निवेश्यम्,तथा च स्वविशिष्टप्रतिबन्धकतावत्त्वस्वाश्रयत्वोभयसम्बन्धेन यद्रूपावच्छिन्नविषयिताव्यापिका विरोध्यनुमितिजनकता तद्रूपावच्छिन्नत्वमिति लक्षणार्थः पर्यवसितः । प्रतिबन्धकतायां स्ववैशिष्ट्यञ्च स्ववृत्तिप्रतिबध्यतानिरूपितत्वस्वव्यापकत्वस्वावच्छेदकचरमप्रकारत्वावच्छिन्नत्वैतत्त्रितयसम्बन्धेन , प्रतिबध्यतायां स्ववृत्तित्वं च स्वावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपित प्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितत्वसम्बन्धेन । एवञ्च ह्रदो वह्निमान् धूमादित्य-

त्र जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्भदेऽपि नातिव्याप्तिः, जलव्यापकवह्न्यभावकालीनजलवद्भदविषयकत्वावच्छिन्नप्रतिबन्धकतायास्सत्प्रतिपक्षज्ञानीयजनकताव्यापकत्वेऽपि स्वपदग्राह्यवह्न्यभावव्याप्यव्याप्यवद्भदविषयकत्वावच्छिन्नजनकताव्यापकत्वाभावेनोक्तोभयसम्बन्धेन जनकताया उक्तोभयवद्भदत्वावच्छिन्नविषयिताव्यापकत्वाभावात् । जलं वृत्तित्वाभाववदित्यत्र जलव्यापकवृत्तित्वव्याप्यसमानाधिकरणजलवज्जलरूपसत्प्रतिपक्षोन्नायकेऽपि नातिव्याप्तिः, तत्र सत्प्रतिपक्षोन्नायकज्ञानीयजनकताव्यापकत्वस्य तद्घटकबाधप्रतिबन्धकतायां सत्त्वेऽपि स्वावच्छेदकचरमप्रकारत्वावच्छिन्नत्वाभावात्, तत्र व्यापकत्वविशेष्यतानिरूपितजलप्रकारतानिरूपितजलत्वनिष्ठनिरवच्छिन्नप्रकारताया एव चरमतया तदवच्छिन्नत्वस्य वृत्तिजलत्वावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबन्धकतायामसत्त्वात् । एकरूपेण जनकतापक्षे स्वव्यापकत्वस्याप्युक्तप्रतिबन्धकतायामसत्त्वात् । शैवालव्यापकवृत्तित्वव्याप्यसमानाधिकरणशैवालवज्जलमितिज्ञानेऽप्युक्तजनकतायास्सत्त्वेनोक्तबाधप्रतिबन्धकतया असत्त्वात् । न च वृत्तित्वं तादात्म्यसम्बन्धावच्छिन्नत्वाभाववदित्यत्र तादात्म्यसम्बन्धेन तद्व्यक्तिव्यापकतादात्म्यसम्बन्धावच्छिन्नत्वव्याप्यवन्निरूपिततादात्म्यसम्बन्धावच्छिन्नवृत्तितावत्तद्व्यक्तिमद्वृत्तित्वरूपे सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः, अनुगतरूपेण जनकत्वाङ्गीकारेऽपि सम्बन्धभेदेन जनकताया भिन्नतया तादात्म्यसम्बन्धावच्छिन्नवृत्तित्वविषयिताघटितधर्मावच्छिन्नजनकताव्यापकत्वस्य उक्तस्थलीयबाधप्रतिबन्धकतायां सत्त्वादिति वाच्यम् ; स्वावच्छेदकीभूता या व्यापकत्वनिष्ठविशेष्यतानिरूपिततद्व्यक्तिनिष्ठप्रकारतानिरूपिततद्व्यक्तित्वनिष्ठनिरवच्छिन्नप्रकारता तदवच्छिन्नत्वस्य उक्तप्रतिबन्धकतायामसत्त्वात् । स्वावच्छेदकधर्म —

सम्बन्धोभयावच्छिन्नत्वस्वनिरूपितव्यापकत्वप्रकारतानिरूपितसाध्याभाव-प्रकारतानिरूपितसामानाधिकरण्यप्रकारतानिरूपिततत्वोभयसम्बन्धेन प्रकारताविशिष्टप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वेनानुगतरूपेण जनकत्वे सम्बन्धभेदेन जनकताभेदानावश्यकत्वाच्च । ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावव्याप्यव्याप्यवह्न्यभाववद्ह्रदे नातिव्याप्तिः , एकरूपेण जनकतापक्षे जनकताव्याप्यत्वस्य प्रतिबन्धकतायामसत्त्वात् , स्वावच्छेदकचरमप्रकारत्वावच्छिन्नत्वस्य विरहाच्च । प्रकारतायां चरमत्वं धर्मितावच्छेदकताभिन्नत्वे सति तदनवच्छिन्नत्वे सति वा निरवच्छिन्नत्वम् , तेन तत्र बाधप्रतिबन्धकतायास्तादृशजनकतावच्छेदकीभूतनिरवच्छिन्नवह्नित्वादिनिष्ठप्रकारत्वावच्छिन्नत्वेऽपि नोक्तसत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः । तादृशप्रतिबन्धकतावच्छेदकीभूतवह्नित्वनिष्ठनिरवच्छिन्नप्रकारतायां वह्न्यभावव्याप्यव्याप्यत्वनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकतारूपत्वात्तदवच्छिन्नत्वाद्वा । उक्तपरिष्कारस्यानुगमस्तु–जनकतावृत्तिरूपवत्त्वं सत्प्रतिपक्षत्वम्,जनकतावृत्तित्वं तु स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन, स्वाधिकरणता स्वावच्छिन्नविषयितावत्त्वसम्बन्धावच्छिन्ना, भेदप्रतियोगितावच्छेदकता स्वविशिष्टप्रतिबन्धकतावत्त्वस्वाश्रयत्वोभयसम्बन्धावच्छिन्ना । प्रतिबन्धकतायां स्ववैशिष्ट्यञ्च पूर्वोक्तसम्बन्धत्रयेणेति । अथवा सत्यन्तघटकप्रतिबन्धकतायां विरोद्ध्यनुमितिनिरूपितयत्किञ्चिज्जनकताव्यापकत्वे सति तादृशजनकतावच्छेदकतावच्छेदकविषयितात्वव्यापकावच्छेदकताकत्वं निवेश्यम् , तथा च पूर्वोक्तभेदप्रतियोगितावच्छेदकता स्वविशिष्टप्रतिबन्धकतावत्त्वस्वाश्रयत्वोभयसम्बन्धावच्छिन्ना । प्रतिबन्धकतायां स्ववैशिष्ट्यञ्च स्ववृत्तिप्रतिबद्ध्यतानिरूपितत्वस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वोभ-

यसम्बन्धेन। स्वाधिकरणता स्वावच्छेदकसामानाधिकरण्यविषायताभिन्नपरम्परासम्बन्धानवच्छिन्नप्रकारतात्वस्वाश्रयत्वान्यतरसम्बन्धावच्छिन्ना, भेदप्रतियोगितावच्छेदकता स्वावच्छेदकत्वस्वाश्रयत्वान्यतरसम्बन्धावच्छिन्नेति। तथा च जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्भूदे नातिव्याप्तिः, एकरूपेण प्रतिबन्धकतापक्षे वह्न्यभावव्याप्यव्याप्यवद्भूदत्वावच्छिन्नविषयित्वावच्छिन्नजनकतावच्छेदकविषयताव्यापकावच्छेदकताकत्वस्य तादृशप्रतिबन्धकतायां सत्त्वेऽपि तादृशजनकताव्यापकत्वविरहात् । वृत्तित्वं तादात्म्यसम्बन्धावच्छिन्नत्वाभाववदित्यत्र सत्प्रतिपक्षोन्नायकेऽपि नातिप्रसङ्गः, तत्र तद्घटकबाधप्रतिबन्धकतायां तादृशजनकताव्यापकत्वसत्त्वेऽपि तादृशजनकतावच्छेदकविषयितात्वव्यापकतावच्छेदकताकत्वविरहात् । एतेन स्वावच्छेदकचरमप्रकारत्वावच्छिन्नत्वघटितसम्बन्धत्रयेण प्रतिबन्धकतायां स्वविशिष्टत्वनिवेशे वह्न्यभाववद्भूदकालीनजलव्यापकवह्न्यभावव्याप्यसमानाधिकरणतादृशजलवद्भूदेऽतिव्याप्तिः, तत्र बाधप्रतिबन्धकतायां जनकतावच्छेदकचरमप्रकारत्वावच्छिन्नत्वस्य भिन्नरूपेण जनकतापक्षे तादृशजनकताव्यापकत्वस्य च सत्त्वादिति निरस्तम्, तादृशजनकतावच्छेदकविषयितात्वव्यापकावच्छेदकताकत्वविरहेणोक्तपरिष्कारेऽतिव्याप्तिविरहादिति ।

यत्तु विरोध्यनुमितिनिरूपितयात्किञ्चिज्जनकताव्यापकत्वं सत्यन्तघटकप्रतिबन्धकतायां निवेश्यते, तथा च स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावत्त्वस्वविशिष्टप्रतिबन्धकतावत्त्वोभयसम्बन्ध एव प्रतिबध्यतावृत्तिरूपवत्त्वरूपानुगतसत्प्रतिपक्षलक्षणघटकव्यापकताघटकप्रतियोगितावच्छेदकतावच्छेदकसम्बन्धः । स्वविशिष्टत्वञ्च स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतात्वविशिष्टत्वस्वावच्छेदकावच्छिन्नप्रतिबद्धयतानि-

रूपितत्वोभयसम्बन्धेन, जनकताविशिष्टत्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वसम्बन्धेन । विशेष्यदलन्तु जलव्यापकवह्न्यभावकालीनजलवद्भूदेऽतिव्याप्तिवारणाय, तथा च वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्भूदे नातिव्याप्तिः । अत्र बाधप्रतिबन्धकतायां तज्ज्ञाननिष्ठजनकताव्यापकत्वाभावादित्याशङ्क्य, ह्रदो वह्निमानित्यत्रैव जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्भूदेऽतिव्याप्तिः । तज्ज्ञाननिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायास्सत्प्रतिपक्षज्ञानीयजनकताव्यापकत्वात्, यज्जनकताव्यापकत्वं प्रतिबन्धकतायां तज्जनकतानतिरिक्तवृत्तित्वविवक्षणेऽपि जलं वृत्तित्वाभाववदित्यादिस्थलीयसत्प्रतिपक्षोन्नायके एकरूपेण जनकतापक्षे वृत्तित्वं तादात्म्यसम्बन्धावच्छिन्नत्वाभाववदित्यत्र सत्प्रतिपक्षोन्नायके चातिव्याप्तिरिति दूषितम्, तदप्येतेन निरस्तम् ; उक्तस्थले प्रतिबन्धकतायां तादृशजनकतावच्छेदकचरमप्रकारत्वावच्छिन्नत्वस्य तादृशजनकतावच्छेदकविषयितात्वव्यापकतावच्छेदकत्वस्य चाभावात् । किञ्च भवदुक्तानुगमोपरि जलव्यापकवह्न्यभावकालीनजलवह्न्यभावव्याप्यव्याप्योभयवद्भूदेऽतिव्याप्तिरेव न लगति, तत्र स्वपदेन बाधप्रतिबद्धत्वोपादाने तादृशप्रतिबद्धतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकताया उक्तोभयवद्भूदविषयकनिश्चये विरहात् । स्वपदेन सत्प्रतिपक्षज्ञानीयप्रतिबद्धत्वोपादाने तादृशप्रतिबद्धतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावत्वस्य तादृशनिश्चये सत्त्वेऽपि स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकताविशिष्टत्वस्वावच्छेदकावच्छिन्नप्रतिबद्धतानिरूपितत्वोभयसम्बन्धेन स्वविशिष्टप्रतिबन्धकतावत्वस्य तादृशनिश्चयेऽसम्भवात् । स्वपदेन सत्प्रतिपक्षोन्नायकज्ञानीयजनकताया

एव सङ्गृहीततया, तद्व्यापकत्वस्य उक्तज्ञानविशिष्टज्ञाननिष्ठप्रतिबन्धकतायामसत्त्वादिति । यदपि वृत्तित्वं तादात्म्यसम्बन्धावच्छिन्नत्वाभाववदित्यत्र सत्प्रतिपक्षोन्नायकातिव्याप्तिवारणाय प्रतिबन्धकतानिरूपितानतिरिक्तवृत्तित्वस्वरूपसम्बन्धरूपोभयविधावच्छेदकत्वस्य यद्रूपावच्छिन्नविषयितायां निवेशः, उक्तसत्प्रतिपक्षोन्नायकविषयितायाः बाधज्ञानप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वविरहेण नातिव्याप्तिरित्याशङ्क्य, तादृशस्थल एव साद्ध्याभावसाद्ध्याभावव्याप्यव्याप्योभयवत्पक्षेऽतिव्याप्तेरुक्तविवक्षणं न सम्भवतीति दूषितम् ; तन्न, उन्नायकदळप्रविष्टजनकताव्यापकत्वस्य प्रतिबन्धकतायां निविष्टतयैव ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतामादाय ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभावव्याप्यव्याप्यवद्ध्रदरूपसत्प्रतिपक्षोन्नायकातिव्याप्त्यप्रसक्तेः । वृत्तित्वं तादात्म्यसम्बन्धावच्छिन्नत्वाभाववदित्यादिस्थलीयसत्प्रतिपक्षोन्नायकातिव्याप्तेश्च—प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेनैव वारणेनानतिरिक्तवृत्तित्वनिवेशस्य निष्फलत्वेन शङ्काया अयुक्तत्वात् । उक्तादात्म्यसम्बन्धावच्छिन्नत्वाभावसाध्यकस्थले साद्ध्याभावसाद्ध्याभावव्याप्यव्याप्योभयवत्पक्षेऽतिव्याप्त्या दूषणमप्ययुक्तम् , उक्तोभयवत्पक्षस्य जनकत्वप्रतिबन्धकत्वघटितविशिष्टान्तरत्वाक्रान्तेन तादृशसत्प्रतिपक्षोन्नायकेन घटितत्वेनैव वारणात् , विशिष्टान्तराघटितत्वशरीरे प्रतिबन्धकतानिरूपितोभयविधावच्छेदकत्वनिवेशस्य उक्तविशिष्टातिव्याप्तिसम्पादकस्य विवक्षणानर्हत्वात् । अनतिरिक्तवृत्तित्वमात्रस्यैव तत्र निवेशनीयत्वादिति वदन्ति । इदन्तु न युक्तम् , प्रतियोगिवैयधिकरण्यगर्भतदगर्भव्याप्तिज्ञानयोरनुगतरूपेण जनकतया जनकताव्यापकत्वस्य प्रतिबन्धकतायामभावेन व्यापकताघटितसत्प्रतिपक्षेऽव्याप्तेरिति ।

इदन्तु तत्त्वम् ; स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयत्किञ्चिद्रूपावच्छिन्नविषयित्वाव्यापकत्वस्य जनकतायां निवेशान्नोक्तातिव्याप्तयः, स्वावच्छिन्नाविषयकप्रतीतिविषयितावच्छेदकसाद्ध्याभावव्याप्यावत्पक्ष—तावच्छेदकावच्छिन्नविषयित्वाव्यापकत्वस्य निरुक्तविशिष्टविषयिताव्यापक-

जनकतायामभावात् । न च सत्प्रतिपक्षज्ञानस्यानुगतरूपेण साद्ध्याभावानुमितिजनकत्वस्वीकर्तृमते असम्भवः , स्वावच्छिन्नाविषयकप्रतीतिविषयितावच्छेदकशैवालव्यापकवह्न्यभावसमानाधिकरणशैवालवद्ह्रदत्वावच्छिन्नविषयित्वाव्यापकत्वस्य जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ह्रदविषयनिश्चयीयजनकतायामसत्त्वात् । एकसम्बन्धेन साद्ध्याभाववदवृत्तिमत्पक्षविषधिकनिश्चयीयजनकतायामन्यसम्बन्धेन साद्ध्याभावाभाववदवृत्तिमत्पक्षरूपविशिष्टान्तरविषयित्वाव्यापकत्वस्याभावाच्च , एतेनोक्तविवक्षणे व्यापकताघटितसत्प्रतिपक्षमात्रेऽव्याप्त्यभिधानं केषाञ्चिदनादेयम् , उक्तरीत्या असम्भवस्यैव प्रसङ्गादिति वाच्यम् ; स्वावच्छिन्नविषयकत्वाव्यापकविषयिताशून्यज्ञानीयत्वस्य विशिष्टान्तविषयतायां निवेशेनैवोक्तासम्भवाभावात् । शैवालव्यापकवह्न्यभावसमानाधिकरणशैवालवद्ह्रदविषयतायाजलव्यापकवह्न्यभावसमानाधिकरणजलवद्ह्रदत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयत्वाभावात् । संयोगेन साद्ध्याभावाभाववदवृत्तिमत्पक्षविषयित्वाव्यापकविषयिताशून्यज्ञानीयत्वस्य सम्बन्धान्तरेण तद्विशिष्टपक्षविषयितायामभावाच्च ।

यत्तूक्तरीत्या विशिष्टान्तराघटितत्वनिवेशने वह्न्यभावव्यापकं यज्जलव्यापकवह्न्यभावसमानाधिकरणजलं तत्समानाधिकरणवह्न्यभाववद्ह्रदात्मके सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः ; तज्ज्ञानीयजनकतायाः निरुक्तविशेषणाक्रान्तविशिष्टान्तरविषयित्वाव्यापकत्वात् , उक्तविशिष्टविषयितायाः बाधज्ञानीयप्रतिबन्धकतावच्छेदकत्वाच्चेति । तन्न , विशिष्टान्तरविषयित्वाव्यापकस्वविषयिताव्यापकप्रतिबन्धकताकत्वस्यापि विशेषणस्य सत्त्वेन तेनैव तादृशसत्प्रतिपक्षोन्नायकस्य वारणात् । तज्ज्ञाननिष्ठबाधप्रतिबन्धकतायां वह्न्यभाववद्ह्रदरूपविशिष्टान्तरविषयिताव्यापकत्वेन तदव्यापकप्रतिबन्धकताया अप्रसिद्धेः । विशिष्टान्तरविषयितायां च स्वावच्छिन्नाव्यापक—

विषयिताशून्यज्ञानीयत्वं विशेषणम् , तेन व्यापकताघटितसत्प्रतिपक्षज्ञानीयप्रतिबन्धकतायाः जलव्यापकवह्न्यभावकालीनजलवद्ह्रदरूपविशिष्टविषयिताव्यापकत्वेऽपि न क्षतिः ।

यत्तु स्वावच्छिन्ननिरूपितविशिष्टविषयित्वाव्यापकत्वस्य प्रतिबन्धकताविशेषणतयैव निर्वाहे जनकत्वप्रतिबन्धकत्वोभयस्मिन् विशिष्टान्तरविषयित्वाव्यापकत्वविशेषणं व्यर्थमिति । तन्न, साद्ध्याभावाभाववदवृत्तिमत्पक्षे प्रतिहेतुतावच्छेदकघटितेऽतिव्याप्तेः । वह्न्यभावाभाववदवृत्तिजलं जलवान् ह्रद इति ज्ञानयोः ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया तादृशप्रतिबन्धकतायाः जलत्वाघटितवह्न्यभावाभाववदवृत्तिमत्पक्षविषयित्वाव्यापकत्वात् । विशिष्टान्तरविषयित्वाव्यापकजनकताकत्वस्यापि निवेशे च तत्र नातिप्रसङ्गः, जलत्वादिविषयितामनन्तर्भाव्य वह्न्यभावाभाववदवृत्तिमत्पक्षादिविषयकज्ञानत्वेनैव जनकतया तादृशजनकतायाः स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयं यद्विशिष्टान्तविषयित्वं तादृशस्य वह्न्यभावाभाववदवृत्तिमत्पक्षादिविषयित्वस्य व्यापकतया तदव्यापकजनकतात्वाभावात् । नच साद्ध्याभावाभाववद्वृत्तित्वाभावसाद्ध्याभावाभाववद्वृत्तित्ववद्भेदज्ञानयोस्साद्ध्याभावाभाववदवृत्तित्वप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नविशेष्यताशालिबुद्धिप्रतिबन्धकतावच्छेदकविषयिताशालिनिश्चयत्वेन अनुगतरूपेण जनकतायाः केवलान्वयिग्रन्थसिद्धत्वेन प्रतिहेतुतावच्छेदकघटितोक्तसत्प्रतिपक्षेऽतिव्याप्तिर्दुर्वारैव, उक्तजनकतायाः केवलसाद्ध्याभावाभाववदवृत्तिमत्पक्षज्ञानसाधारण्यविरहेण विशिष्टान्तरविषयित्वाव्यापकत्वस्य स्वविषयिताव्यापकजनकतायामक्षतत्वात्, तथा च विशिष्टान्तराघटितत्वेन न तद्वारणसम्भव इति, परामर्शे तादृशविशिष्टाविषयकत्वं निवेश्यैव वारणीयमिति विशिष्टान्तराघटितत्वशरीरे जनकतायां विशिष्टान्तरविषयित्वाव्यापकत्वनिवेशनमनर्थकमिति वाच्यम्,—विशिष्टा-

न्तरविषयित्वाव्यापकत्वं हि विशिष्टान्तरविषयितासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्, भेदप्रतियोगितावच्छेदकता च-स्वनिरूपितजन्यतावच्छेदकावच्छिन्नजन्यतानिरूपितजनकतावत्वसम्बन्धावच्छिन्ना, तथा च हेतुतावच्छेदकाघटितज्ञानीयजनकत्वतद्घटितज्ञानीयजनकत्वयोर्भेदेऽपि तयोरेकधर्मावच्छिन्नजन्यतानिरूपितत्वेन निरुक्तसम्बन्धेन विशिष्टान्तरविषयित्वाव्यापकत्वावरहात्, हेतुतावच्छेदकघटितविशिष्टज्ञानीयजनकताया अप्युक्तसम्बन्धेन हेतुतावच्छेदकाघटितसाद्ध्याभावाभाववदवृत्तिमत्पक्षज्ञानसाधारण्यात्। एवं वह्न्यभावव्याप्यव्याप्यवन्यभाववान् ह्रद इति ज्ञानस्य वह्न्यभावव्याप्यव्याप्यवह्न्यभावत्वावच्छिन्नप्रकारत्वघटितेन विशिष्टवह्न्यभावांशे भ्रमत्वग्रहाभावघटितेन च रूपेण पृथक्प्रतिबन्धकत्वस्य जगदीशेन व्यवस्थापितत्वेन तत्पक्षेऽपि न वह्न्यभावव्याप्यव्याप्यवह्न्यभाववद्ह्रदेऽतिव्याप्तिः । विशिष्टान्तरविषयितासमानाधिकरणभेदप्रतियोगितानिरूपिता या स्वनिरूपितप्रतिबद्ध्यतावच्छेदकावच्छिन्नप्रतिबद्ध्यतानिरूपितप्रतिबन्धकतावत्वसम्बन्धावच्छिन्नावच्छेदकता तस्या एव विशिष्टान्तरविषयित्वाव्यापकत्वपदार्थत्वात् । अनयैव रीत्या सामान्यलक्षणे मेयत्वविशिष्टं यद्धूमाभाववद्वृत्तित्वं तत्प्रकारकवह्नित्वावच्छिन्नविशेष्यकनिश्चयत्वेन पृथक्प्रतिबन्धकत्वे तत्रातिव्याप्तिर्वारणीया, तादृशप्रतिबन्धकतायास्स्वरूपसम्बन्धेन विशिष्टान्तरविषयित्वाव्यापकत्वेऽप्युक्तसम्बन्धेन विशिष्टान्तरविषयित्वाव्यापकत्वविरहात् । न चैवं जनकतायां विशिष्टान्तरविषयित्वाव्यापकत्वनिवेशनमफलम्, प्रतिहेतुतावच्छेदकघटितसाद्ध्याभावाभाववदवृत्तिमत्पक्षस्यापि विशिष्टान्तरविषयितासमानाधिकरणभेदप्रतियोगितानिरूपिता या स्वनिरूपितप्रतिबद्ध्यतावच्छेदकावच्छिन्नप्रतिबद्ध्यतानिरूपितप्रतिबन्धकतावत्वसम्बन्धावच्छिन्नावच्छेदकता तदाश्रयप्रतिबन्धकताकत्वाभावादेव वारणात्, केवलसाध्याभावाभाववदवृत्तिमान् पक्ष इति ज्ञानस्यापि साद्ध्यवत्ताबुद्धिप्रतिबन्धकत्वा-

दिति वाच्यम्, वह्न्यभाववद्ह्रदवह्न्यभावव्याप्यव्याप्यवद्वृत्तिवह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपविशिष्टेऽतिव्याप्तिवारणाय तदावश्यकत्वात् । तत्र प्रतिबन्धकतायां विशिष्टान्तरविषयित्वाव्यापकत्वानपायात् । वस्तुतो विशिष्टान्तरविषयित्वाव्यापकत्वं प्रतिबन्धकतायां स्वरूपसम्बन्धेनैव वाच्यम्, न तूक्तसम्बन्धेन, तथा सति बाधघटितसत्प्रतिपक्षाव्याप्तिप्रसङ्गात्, तत्र बाधविषयितासमानाधिकरणभेदप्रतियोगितानिरूपितस्वरूपसम्बन्धावच्छिन्नावच्छेदकताश्रयत्वस्य सत्प्रतिपक्षप्रतिबन्धकतायां सत्वेऽपि निरुक्तसम्बन्धावच्छिन्नताद्दशप्रतियोगितावच्छेदकत्वविरहात् । एवमभावव्यापकगगनाभाववद्भाववत्कालीनगगनाभावसमानाधिकरणाभाववद्घटे घटो गगनाभाववद्भाववत्कालीनगगनवानित्यादिस्थलीयसत्प्रतिपक्षेऽव्याप्तिश्च, तत्राभाववान् गगनाभाववान् अभाववांश्च घट इति निश्चययोरेकविशिष्टापरत्वेन प्रतिबन्धकतया निरुक्तसम्बन्धेन गगनाभाववद्भाववत्कालीनगगनाभावसमानाधिकरणाभाववद्घटरूपविशिष्टान्तरविषयित्वाव्यापकत्वस्य सत्प्रतिपक्षीयप्रतिबन्धकतायामभावात् । न च तत्र सत्प्रतिपक्षज्ञानस्य पृथक्प्रतिबन्धकत्वे मानाभावात् स्वरूपसम्बन्धेन विशिष्टान्तरविषयित्वाव्यापकत्वनिवेशेऽप्यव्याप्तिर्दुर्वारैवेति वाच्यम्, मेयत्वव्यापको गगनाभाववद्भाववत्कालीनगगनाभावः—मेयत्ववांश्च घट इति ज्ञानयोः पृथक्प्रतिबन्धकत्वस्यावश्यकतया एकरूपेण प्रतिबन्धकतापक्षे तादृशप्रतिबन्धकतायां उक्तसत्प्रतिपक्षज्ञानसाधारण्यात् स्वरूपसम्बन्धेन व्यापकत्वनिवेशे दोषाभावात् । एवञ्च प्रतिहेतुतावच्छेदकघटितसाद्ध्याभावाभाववदवृत्तिमत्पक्षेऽतिव्याप्तिवारकतयैव विशिष्टान्तरविषयित्वाव्यापकजनकतावत्त्वं विशिष्टान्तरघटितत्वशरीरे निवेशनीयम । अत्र प्रकारकोटावधिकपदार्थविषयकनिश्चयस्य पृथक्प्रतिबन्धकतापक्षे वह्न्यभावव्याप्यव्याप्यवह्न्यभाववद्ह्रदेऽतिव्याप्तिस्तु यद्रूपावच्छिन्नविषयितायां तादृशविषयिताभिन्नत्वं निवेश्य

वारणीया । सामान्यलक्षणेऽपि स्वरूपसम्बन्धेनैव विशिष्टान्तविषयित्वाव्यापकत्वं निवेश्यम्, नतूक्तसम्बन्धेन, पूर्वोक्तदोषस्य सामान्यलक्षणेऽप्यविशेषात् । प्रकारकोटावधिकपदार्थावगाहिनिश्चयस्य पृथक्प्रतिबन्धकतापक्षे प्रकारकोटावधिकपदार्थघटितस्यापि दोषत्वात् । धर्मितावच्छेदककोटावधिकपदार्थघटितस्यैव तैर्दोषत्वानुपगमात् । अतएव मेयत्वविशिष्टव्यभिचारादाविति प्रतीकमुपादाय व्याख्यातं जगदीशेन–अत्र मेयत्वविशिष्टं यद्व्यभिचारादिसाधनं तत्रत्येत्यर्थः कार्यः नतु मेयत्वविशिष्टं यद्व्यभिचारित्वं तद्वति साधन इत्यर्थः, तादृशस्य लक्ष्यत्वात्, साधनधर्मिकप्रमेयत्वविशिष्टव्यभिचारित्वप्रकारकनिश्चयत्वेनापि व्याप्तिबुद्धौ स्वातन्त्र्येण प्रतिबन्धकत्वात्, इत्यादिना । तथा च निरुक्तविशिष्टान्तराघटितत्वविरहान्नोक्तोभयवद्धूमादावतिव्याप्तिरिति दिक् ।

ननु वह्न्यभाववान् ह्रदो वह्निमानित्यत्र प्रकृतानुमित्यप्रसिद्ध्या सत्प्रतिपक्षाव्याप्तिरिति चेन्न , प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाद्ध्यतावच्छेदकावच्छिन्नप्रकारताशालिज्ञानत्वव्यापकप्रतिबद्ध्यतायाः एव निवेशात् , व्यापकत्वञ्च स्वावच्छेदकाभावप्रतियोग्युपहितत्व–स्वाश्रयत्वान्यतरसम्बन्धेन, तथा चाहार्यज्ञाने स्वरूपसम्बन्धेन प्रतिबद्ध्यतायाविरहेऽपि प्रतिबद्ध्यतायाः अनाहार्यत्वाद्यवच्छिन्नतया स्वायच्छेदकाभावप्रतियोग्याहार्यत्वादिमत्तासम्बन्धेन तत्सत्त्वेन तादृशज्ञानत्वव्यापकप्रतिबद्ध्यतायाः प्रसिद्धेः, वह्न्यभाववान् ह्रदो वह्निमानित्यत्र तादृशाहार्यज्ञानाभादायैव लक्षणसमन्वयः, वह्निमान् निर्वह्निरित्यत्र धर्मितावच्छेदकनिष्ठप्रत्यासत्त्याप्रतिबद्ध्यप्रतिबन्धकभावकल्पनाद्घटो वह्न्यभाववानित्यादिज्ञाननिष्ठप्रतिबद्ध्यतामादाय लक्षणसमन्वयः , तादृशप्रतिबद्ध्यतायाः स्वावच्छेदकाभावप्रतियोग्याहार्यत्ववत्यसम्बन्धेन वह्निमान् निर्वह्निमानिति ज्ञाने सत्त्वात्, दीधित्याद्यरूनुरोधेन तु यद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमिति-

सामान्ये पक्षे साद्ध्यवैशिष्ट्यावगाहित्वाभावो विषयिताप्रयुक्तस्तद्रूपावच्छिन्नत्वे सति पक्षविशेष्यतानिरूपितपक्षतावच्छेदकप्रकारत्वाभावत्ववृत्तिसाद्ध्यविशेष्यतानिरूपितसाद्ध्यतावच्छेदकप्रकारत्वाभावत्ववृत्तियत्पक्षसाद्ध्यवैशिष्ट्यावगाहित्वाभावत्ववृत्तिरूपं तादृशरूपावच्छिन्नविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयिता तद्रूपावच्छिन्नत्वस्य लक्षणार्थत्वात्, प्रथमवृत्तिताद्वयं स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसम्बन्धेन, स्वाधिकरणत्वं च स्वावच्छिन्नविषयताशालिनिश्चयान्यवहितोत्तरानुमितित्वसम्बन्धावच्छिन्नम्, अभावप्रतियोगितविषयिताप्रयुक्तादिकरणत्वसम्बन्धावच्छिन्ना, चरमवृत्तित्वं स्वसमानाधिकरणेत्यादिव्यापकत्वसम्बन्धेन, स्वाधिकरणता स्वावच्छिन्नविषयताशालिनिश्चयोत्तरानुमितित्वसम्बन्धेन, भेदप्रतियोगितावच्छेदकता विषयताप्रयुक्ताधिकरणत्वसम्बन्धावच्छिन्ना, तथा च वह्न्यभाववान् ह्रदो वह्निमानित्यत्र सत्प्रतिपक्षनिश्चयोत्तरानुमितिसामान्ये विषयिताप्रयुक्तस्य पक्षसाद्ध्यवैशिष्ट्यावगाहित्वाभावस्य सत्त्वात्सत्यन्तवत्त्वात्, बाधनिश्चयोत्तरानुमितिसामान्ये पक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावसाद्ध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावयोर्विषयिताप्रयुक्तयोरभावेन पक्षसाद्ध्यवैशिष्ट्यावगाहित्वाभावस्य विषयिताप्रयुक्तस्य सत्त्वेन च बाधत्वस्य तादृशत्वेन तदवच्छिन्नोन्नायकत्वाच्च लक्षणसङ्गतिः, ह्रदो वह्निमानित्यादौ ह्रदत्वादिप्रकारकबुद्धित्वस्य कस्यापि प्रतिबद्ध्यतानवच्छेदकत्वेन तदभावस्य विषयिताप्रयुक्तत्वाभावेऽपि न क्षतिः, विषयिताप्रयुक्ताधिकरणत्वसम्बन्धावाच्छन्नह्रदत्ववैशिष्ट्यावगाहित्वाभावत्वावच्छिन्नाभावस्य व्यधिकरणसम्बन्धावच्छिन्नाभावतया केवलान्वयित्वेन तत्रोक्तसम्बन्धेन बाधत्वस्य वृत्तेर्लक्षणगमनात् ।

एतेन यद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमितिसामान्ये पक्षसाद्ध्यवैशिष्ट्यावगाहित्वाभावो विरोधिविषयताप्रयुक्तः तद्रूपावच्छिन्नत्वे सति य-

द्रूपावच्छिन्नविषयिकनिश्चयोत्तरानुमितिसामान्ये पक्षे पक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावो विरोधिविषयिताप्रयुक्तः तद्रूपावच्छिन्नविषयित्वान्यत्वे सति यद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितिसामान्ये साद्ध्ये साद्ध्यतावच्छेदकवैशिष्ट्यावगाहित्वाभावो विरोधिविषयिताप्रयुक्तः तद्रूपावच्छिन्नविषयत्वान्यत्वे च सति यद्रूपावच्छिन्नविषयताशालिनिश्चयोत्तरानुमितिसामान्ये प्रकृतपक्षे साद्ध्यवैशिष्ट्यावगाहित्वाभावो विरोधिविषयिताप्रयुक्तः तद्रूपावच्छिन्नविषयिताशाल्यनुमितिनिष्ठजन्यतानिरूपितजनकता यद्रूपावच्छिन्नविषयताव्यापिका तद्रूपावच्छिन्नत्वमिति परिष्कारो निरस्तः, ह्रदो वह्निमान् धूमादित्यादौ विरोधिविषयिताप्रयुक्तस्य ह्रदत्ववैशिष्ट्यावगाहित्वाभावस्य यद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकत्वं तादृशरूपावच्छिन्नविषयताया अप्रसिद्धेः, उक्तरीत्या ह्रदत्वप्रकारत्वाभावास्य विरोधिविषयताप्रयुक्तत्वाभावादव्याप्तेस्सर्वत्र विरोधिपदवैयर्थ्याच्च । उन्नायकत्वाभावादेव सिद्धिविषयेऽतिव्याप्तिवारणात् । नचैवं वह्निमान् ह्रदो वह्निमान् इत्यत्राव्याप्तिः । उक्तस्थले बाधनिश्चयोत्तरानुमितिसामान्ये विषयताप्रयुक्तस्य पक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावस्य सत्त्वेन बाधत्वस्योक्तसम्बन्धेन पक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावत्ववृत्तित्वाभावादिति वाच्यम्, पक्षसाद्ध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताभिन्नविषयिताप्रयुक्तादिकरणतासम्बन्धस्याभावप्रतियोगितावच्छेदकत्वादुक्तस्थले तादृशाधिकरणतासम्बन्धावच्छिन्नपक्षतावच्छेदकवैशिष्ट्यावगाहित्वाभावत्वावच्छिन्नाभावस्य व्यधिकरणसम्बन्धावच्छिन्नाभावत्वेन केवलान्वयित्वेन तादृशाभावत्वे उक्तसम्बन्धेन बाधत्वस्य वृत्तित्वानपायात् । काञ्चनमयह्रदो वह्निमानित्यादौ चाश्रयासिद्धत्वस्य ह्रदविशेष्यत्वावच्छिन्नकाञ्चनमयत्वप्रकारित्वाभावत्वे उक्तसम्बन्धेनावृत्तेर्नाश्रयासिद्ध्यन्नायकातिव्याप्तिः ।

यत्तु स्वावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितित्वसमानाधिकरणपक्षतावच्छेदकनिष्ठप्रकारतानिरूपितपक्षनिष्ठविशेष्यतानिरूपकत्वमेवोन्नेयतावच्छेदकरूपविशेषणमिति; तन्न, काञ्चनमयत्वाभाववत्काञ्चनमयह्रदो वह्निमानित्यत्र पक्षतावच्छेदकप्रकारतानिरूपितपक्षनिष्ठविशेष्यताया आहार्यज्ञानमात्रनिष्ठाया अनुमितित्वसामानाधिकरण्यासम्भवेनाव्याप्तेः । यदि चानुमितित्वसमानाधिकरणपक्षतावच्छेदकताश्रयनिष्ठप्रकारतानिरूपितविशेष्यतासामान्ये स्वावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितित्वसामानाधिकरण्यनिवेशान्न दोषः , उक्तस्थलेऽनुमितित्वसमानाधिकरणयोः काञ्चनमयत्वतदभावप्रकारतानिरूपितह्रदविशेष्यतयोर्बाधनिश्चयोत्तरानुमितिसामानाधिकरण्याल्लक्षणसमन्वयः, तादृशविशेष्यतासामान्यान्तर्गतकाञ्चनमयत्वप्रकारतानिरूपितह्रदविशेष्यत्वस्य काञ्चनमयत्वाभाववद्ह्रदनिश्चयोत्तरानुमितित्वसामानाधिकरण्याभावात्तदुन्नायके नातिव्याप्तिः, स्वावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितित्वसामानाधिकरण्यं च तादृशविशेष्यतायां स्वावच्छेदकपक्षतावच्छेदकपर्याप्तावच्छेदकताकविषयतावत्त्वसम्बन्धेन, तेन तादृशविशेष्यतासामान्यान्तर्गतायाः ह्रदो वह्निमानिति ज्ञानीयायाः विशेष्यतायाः निरूपकतासम्बन्धेन बाधनिश्चयोत्तरानुमितित्वासामानाधिकरण्येऽपि न क्षतिरित्यादिकं विभाव्यते; तदा नोक्तदोष इति ध्येयम् ।

अथात्रापि लक्षणे वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्ह्रदेऽतिव्याप्तिः । न चोन्नेयदळे यद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये पक्षे साद्ध्यवैशिष्ट्यावगाहित्वाभाव इत्यत्र उत्तरपदं व्यर्थम्, बाधनिश्चयस्य पूर्वं परतो वा पक्षे साध्यवैशिष्ट्याद्यवगाह्यनुमितेरसम्भवेन बाधोन्नायके सत्प्रतिपक्षे लक्षणसमन्वयसम्भवात् । अव्यवहितत्वं च स्ववृत्तिकृतिमत्वं पूर्वोत्तरक्षणवृत्तिपदार्थसाधारणं, तथा च नोक्तोभयवद्ह्रदादावतिव्याप्तिसम्भवः, वह्न्यभावव्याप्यवद्ह्रदविषयकनिश्चयाव्यवहितानु-

मितिसामान्ये पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाभावात् । वह्निमान् ह्रद इत्यनुमित्यनन्तरं ह्रदो वह्न्यभावव्याप्यवानिति निश्चयसम्भवात् । अत्र कल्पे सत्यन्तदळन्तु प्रतियोगिवैयधिकरण्यघटितव्यापकताघटितजलव्यापकवह्न्यभावसमानाधिकरणजलवद्ह्रदेऽतिव्याप्तिवारकमिति वाच्यम् । एवमपि वह्न्यभाववान् ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवह्न्यभावोभयवद्ह्रदेऽतिव्याप्तेः । ह्रदो वह्निमानित्यादावपि प्रतियोगिवैयधिकरण्यघटितव्यापकताघटितवह्न्यभावव्याप्यवह्न्यभाववद्ह्रदे चातिव्याप्तेर्दुर्वारत्वात् । उत्तरपदानुपादानेऽप्रामाण्यज्ञानास्कन्दितानुमित्यनन्तरं बाधनिश्चयस्य तदनास्कन्दितानुमित्युत्तरमपि लौकिकसन्निकर्षजन्यबाधनिश्चयस्य सम्भवेनासम्भवस्यैव प्रसङ्गेन उत्तरत्वनिवेशनमसार्थक्यात् । उक्तोभयवद्ह्रदादावतिव्याप्तिर्दुर्वारैवेति चेत् ? अत्र वदन्ति, सत्यन्तघटिकाधिकरणतायां विशिष्टान्तरविषयित्वाप्रयोज्यत्वस्य मेयत्वविशिष्टसत्प्रतिपक्षातिव्याप्तिवारणायावश्यं विवक्षणीयतया तत एवोक्तोभयवद्ह्रदवारणसम्भवः ।

यत्तु विशिष्टान्तरविषयत्वाप्रयोज्यस्वविषयताप्रयोज्यपक्षधर्मिकसाद्ध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताकत्वस्य मेयत्वविशिष्टसत्प्रतिपक्षातिव्याप्तिवारणाय स्वातन्त्र्येण निवेशान्नोक्तोभयवद्ह्रदेऽतिव्याप्तिः ; न चैवं सत्यन्तदळवैयर्थ्यम्, वह्न्यभावव्याप्यव्याप्यवान् वह्न्यभाववान् वह्न्यभावव्याप्यव्याप्यवांश्च ह्रद इति ज्ञानयोरेकविशिष्टापरत्वेन प्रतिबन्धकतया वह्न्यभावव्याप्यव्याप्यवद्ह्रदविषयतायाः पक्षधर्मिकसाद्ध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताप्रयोजकतया तत्रातिव्याप्तिवारकतया तत्सार्थक्यात् ; न च तद्विषयताप्रयोज्यायां उक्ताधिकरणतायां विशिष्टान्तरविषयताप्रयोज्यत्वसम्भवः, वक्ष्यमाणरीत्या विशिष्टान्तरे तादृशत्वनिवेशस्यावश्यकत्वादिति, तन्न, उक्तरीत्या सत्यन्तघटकाधिकरणतायां विशिष्टान्तरविषयित्वाप्रयोज्यत्वनिवेशेनैव निर्वाहे स्वातन्त्र्येण विशिष्टान्तराघटितत्वनिवेशस्य

गौरवग्रस्तत्वेन भवदुक्तवैयर्थ्यशङ्काया अनवतारात् । किञ्च स्वातन्त्र्येण तन्निवेशे मेयत्वविशिष्टसत्प्रतिपक्षेऽतिव्याप्तिश्च वह्निधूमोभयसाद्धयके मेयत्वविशिष्टजलव्यापकवह्न्यभावसमानाधिकरणजलवान् धूमाभाववान् मेयत्वविशिष्टजलव्यापकवह्न्यभावसमानाधिकरणजलवान् ह्रद इति ज्ञानद्वयोत्तरह्रदधर्मिकधूमवैशिष्ट्यावगाहित्वाभावाधिकरणतामादाय विशिष्टान्तराघटितत्वसम्भवात् । एवमुक्तस्थले जलव्यापकवह्न्यभावसमानाधिकरणजलव्यापकधूमाभावसमानाधिकरणजलवद्ह्रदरूपसत्प्रतिपक्षैकदेशे धूमाभावसमानाधिकरणजलव्यापकवह्न्यभावसमानाधिकरणजलवद्ह्रदेऽतिव्याप्तिः, पक्षे धूमवैशिष्ट्यावगाहित्वाभावाधिकरणतामादाय विशिष्टान्तराघटितत्वसम्भवात् । न च सत्यन्तघटकाधिकरणतायां विशिष्टान्तरविषयित्वाप्रयोज्यत्वमात्रनिवेशेऽसम्भवः, स्वविषयताप्रयोज्याधिकरणताया जलवद्ह्रदविषयत्वाप्रयोज्यत्वाभावात्, विशिष्टान्तरविषयतात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशेऽपि सत्प्रतिपक्षविषयतानिष्ठप्रयोजकतावच्छेदकस्य जलव्यापकवह्न्यभावत्वावच्छिन्नविषयिताशालिनिश्चयविशिष्टनिश्चयीयजलवद्ह्रदत्वावच्छिन्नविषयतात्वस्य जलवद्ह्रदत्वावच्छिन्नविषयितात्वव्यापकत्वमव्याहतम् । जलव्यापकवह्न्यभावनिश्चयविशिष्टनिश्चयीयविषयत्वतदविशिष्टनिश्चयीयविषयतयोरभेदादिति वाच्यम्,—विशिष्टान्तरविषयत्वावच्छिन्नव्यापकतानवच्छेदकत्वस्य सत्यन्तघटकविषयतानिष्ठप्रयोजकतायां निवेशेन दोषाभावात् । जलवद्ह्रदविषयतायाः जलवान् ह्रद इति ज्ञानसाधारणतया तत्र सत्प्रतिपक्षीयप्रयोजकत्वावच्छिन्नाभावसत्वेन विशिष्टान्तरविषयतात्वावच्छिन्नव्यापकतानवच्छेदकत्वस्य विषयितानिष्ठप्रयोजकतायामक्षतत्वात्, इत्थञ्च सत्प्रतिपक्षान्तरादिज्ञानकालीनज्ञानस्यैव विषयो यस्सत्प्रतिपक्षः तत्रापि न क्षतिः, तादृशस्थले स्वविषयताप्रयोज्याधिकरणताया विशिष्टान्तरविषयताप्रयोज्यत्वनियमेऽपि स्वविषयतानिष्ठप्रयोजकतायां विशिष्टान्तरविषयिताव्या-

पकतानवच्छेदकत्वाक्षतेः । एवञ्च ह्रदस्समानाधिकरणजलाभाववानित्यादौ बाधघटितसत्प्रतिपक्षेऽपि नाव्याप्तिः, सत्प्रतिपक्षविषयितानिष्ठप्रयोज्यत्वस्य तादृशबाधविषयितात्वावच्छिन्नव्यापकतानवच्छेदकत्वात् । केवलबाधविषयज्ञाने सत्प्रतिपक्षज्ञानीयप्रयोजकत्वावच्छिन्नाभावसत्वात् । विशिष्टान्तरविषयितायां च स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयत्वं निवेश्यम्, तेन सत्प्रतिपक्षविषयितानिष्ठप्रयोज्यताया जलव्यापकवह्न्यभावकालीनजलवद्ह्रदरूपविशिष्टान्तरविषयिताव्यापकतावच्छेदकत्वेऽपि न क्षतिः । न चावच्छेदकावच्छेदेन वह्न्यादिसाद्ध्यके अवच्छेदकावच्छेदेन सत्प्रतिपक्षेऽव्याप्तिः । तत्र ह्रदत्वावच्छिन्नविशेष्यतानिरूपितह्रदत्वव्यापकत्वविशिष्टसंयोगादिसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारत्वाभावाधिकरणताया एव सत्यन्तप्रविष्टतया तत्प्रयोजकतायाश्चासामानाधिकरण्येन सत्प्रतिपक्षविषयतासाधारण्ये विशिष्टान्तरीभूतसामानाधिकरण्येन सत्प्रतिपक्षविषयत्वावच्छिन्नव्यापकतावच्छेदकत्वादिति वाच्यम्, यद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये पक्षसाद्ध्यवैशिष्ट्यावगाहित्वाभावव्याप्याभावाधिकरणताविशिष्टान्तरविषयितात्वावच्छिन्नव्यापकतानवच्छेदकविषयितानिष्ठप्रयोजकतानिरूपितप्रयोज्यतावली तद्रूपावच्छिन्नत्वस्य सत्यन्तार्थत्वेन दोषाभावात् । उक्तस्थले ह्रदत्वव्यापकत्वविशिष्टसंयोगावच्छिन्नवह्निप्रकारत्वाभावव्याप्यो यस्संयोगेन ह्रदे वह्निवैशिष्ट्यावगाहित्वाभावः । तदधिकरणताप्रयोजकतायास्सामानाधिकरण्येन सत्प्रतिपक्षविषयितासाधारण्ये विरहेण तादृशसत्प्रतिपक्षरूपविशिष्टान्तरविषयितात्वावच्छिन्नव्यापकतानवच्छेदकत्वानपायेन तादृशप्रयोजकतामादायैव अवच्छेदकावच्छेदेन साध्यतास्थले अवच्छेदकावच्छेदेन सत्प्रतिपक्षे लक्षणसमन्वयात् ।

यत्तु जलवद्ह्रदविषयतामादायासम्भववारणाय यद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये पक्षधर्मिकसाद्ध्यवैशिष्ट्यावगा-

हेत्वाभावो विरोधिविषयिताप्रयुक्तः । तादृशत्वं विशिष्टान्तरे निवेशनीयमिति । तन्न, एवमपि बाधघटितसत्प्रतिपक्षाव्याप्तेः । विशिष्टान्तरे विरोध्यन्नायकत्वस्यापि निवेशेन तत्र दोषवारणेऽपि वह्निधूमोभयसाध्यके जलव्यापकवह्न्यभावसमानाधिकरणजलव्यापकधूमाभावसमानाधिकरणतादृशजलवद्ह्रदरूपसत्प्रतिपक्षघटितसत्प्रतिपक्षेऽव्याप्तेः । उक्तोभयवद्ह्रदादावतिव्याप्तिश्च, तद्घटकयोः वह्न्यभाववद्ह्रदवह्न्यभावव्याप्यव्याप्यवद्ह्रदयोः प्रत्येकं तादृशत्वाभावात् ।

यदपि बाधघटितसत्प्रतिपक्षाव्याप्तिवारणाय विशिष्टान्तरविषयितानिष्ठप्रयोजकतायां स्वानवच्छेदकधर्मावच्छिन्नत्वस्वप्रयोज्याधिकरणतावृत्तिभेदप्रतियोगितानवच्छेदकत्वोभयसम्बन्धेन प्रयोजकताविशिष्टान्यत्वं देयम्। भेदप्रतियोगितावच्छेदकता च स्वानिरूपितप्रयोज्यत्ववत्त्वसम्बन्धावच्छिन्ना। तथा च बाधघटितसत्प्रतिपक्षस्थले बाधविषयितानिष्ठप्रयोजकतायाः उक्तोभयसम्बन्धेन सत्प्रतिपक्षप्रयोजकताविशिष्टत्वात्तदन्यविशिष्टान्तरविषयितानिष्ठप्रयोजकता विपरीतसत्प्रतिपक्षादिप्रयोजकतैव, तन्निरूपितप्रयोज्यत्वाभावस्य स्वविषयिताप्रयोज्याधिकरणतायां सत्त्वान्न तत्राव्याप्तिः । नचोक्तविशेषणदाने ह्रदो वह्निधूमोभयवानित्यत्र जलव्यापकवह्न्यभावसमानाधिकरणजलव्यापकधूमाभावसमानाधिकरणतादृशजलवद्ह्रदात्मकसत्प्रतिपक्षघटकसत्प्रतिपक्षे मेयत्वविशिष्टेऽतिव्याप्तिः, विशिष्टान्तरभूतावान्तरसत्प्रतिपक्षविषयितानिष्ठप्रयोजकतायाः उक्तोभयसम्बन्धेन महासत्प्रतिपक्षविषयितानिष्ठप्रयोजकताविशिष्टत्वादिति वाच्यम्, स्वावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकताविशिष्टान्यत्वस्यैव विशिष्टान्तरविषयितानिष्ठप्रयोजकतायां निवेश्यत्वात्, महासत्प्रतिपक्षविषयितानिष्ठप्रयोजकतायाः मेयत्वविशिष्टावान्तरसत्प्रतिपक्षविषयितात्वव्यापकरूपावच्छिन्नतया निरुक्तप्रयोज-

कताविशिष्टान्यत्वस्याक्षतत्वेन मेयत्वविशिष्टे तत्रातिव्याप्तिविरहात् । न च ह्रदो वह्निमानित्यत्र ह्रदवृत्तिवह्निव्यापकीभूताभावप्रतियोगिजले मेयत्वविशिष्टेऽतिव्याप्तिः, तत्र वह्निव्यापकीभूताभावप्रतियोगि जलं ह्रदवृत्तिजलमिति ज्ञानयोः परस्परविशिष्टत्वेन प्रतिबन्धकताद्वयस्य स्वीकरणीयतया तथैव विनिगमनाविरहेण प्रयोजकताद्वयस्यापि परस्परावच्छेदकानवच्छिन्नस्य स्वीकरणीयतया द्वयोरपि प्रयोजकतयोः निरुक्तोभयसम्बन्धेन परस्परविशिष्टतया प्रयोजकताविशिष्टप्रयोजकतानिरूपितप्रयोज्यताशून्यत्वस्य स्वविषयताप्रयोज्यपक्षसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायामक्षतत्वात् । स्वविषयितानिष्ठप्रयोजकतायामपि निरुक्तोभयसम्बन्धेन प्रयोजकताविशिष्टान्यत्वनिवेशे तत्रैव लक्ष्यभूते ह्रदवृत्तिवह्निव्यापकीभूताभावप्रतियोगिजलेऽतिव्याप्तिरिति वाच्यम्, स्वप्रयोज्यत्वाभावसमानाधिकरणप्रयोज्यतानिरूपितत्वस्यापि निरुक्तप्रयोजकाविशिष्टघटकतया उक्तस्थले च उक्तप्रयोजकताद्वयस्यापि परस्परनिरूपितप्रयोज्यत्वाभावसमानाधिकरणप्रयोज्यत्वानिरूपितत्वेन निरुक्तप्रयोजकताविशिष्टान्यत्वस्याक्षततया उक्तातिव्याप्त्यनवकाशादिति । तन्न, बाधविषयतानिष्ठाया बाधीयप्रयोजकताया उक्तोभयसम्बन्धेन सत्प्रतिपक्षप्रयोजकताविशिष्टत्वेन वारणेऽपि तादृशबाधविषयतानिष्ठायास्सत्प्रतिपक्षप्रयोजकताया अवारणेन बाधरूपविशिष्टान्तरविषयतानिष्ठसत्प्रतिपक्षप्रयोजकतानिरूपितप्रयोज्यत्वाभावस्य सत्प्रतिपक्षविषयिताप्रयोज्याधिकरणतायामभावेन बाधघटितसत्प्रतिपक्षाव्याप्तेरवारणात्, स्वविषयतानिष्ठप्रयोजकतानिरूपितप्रयोज्यतावत्यां जलव्यापकं समानाधिकरणजलं जलवान् ह्रद इति ज्ञानद्वयानन्तरकालीनानुमितिनिष्ठाधिकरणतायां स्वनिरूपितप्रयोज्यतासम्बन्धेन बाधविषयतानिष्ठप्रयोजकताया अभावेन स्वप्रयोज्याधिकरणतानिष्ठभेदप्रतियोगितानवच्छेदकघटितोभयसम्बन्धेन प्रयोजकताविशिष्टान्यत्वस्याक्षततया उक्तविशेषणेन बाधप्रयोजकत्ववारणाच्च । सत्प्र-

तिपक्षविषयतानिष्ठप्रयोजकतायास्स्वप्रयोज्याधिकरणतावृत्तिभेदप्रतियोगितानवच्छेदकत्वसम्बन्धेन स्वात्मकप्रयोजकताविशिष्टत्वेन तदन्यप्रयोजकता निरूपितप्रयोज्यत्वाभावस्य मेयत्वविशिष्टसत्प्रतिपक्षविषयताप्रयोज्याधिकरणतायां सत्त्वेन तत्रातिव्याप्तिवारणायोपात्तस्य स्वानवच्छेदकधर्मावच्छिन्नत्वस्य व्यर्थत्वाच्च । स्वनिरूपितप्रयोज्यत्वाभावसमानाधिकरणप्रयोज्यतानिरूपितत्वस्य स्वात्मकप्रयोजकतायामभावेनैवोक्तसम्बन्धेन प्रयोजकताविशिष्टान्यत्वस्य सत्प्रतिपक्षप्रयोजकतायां सत्त्वेनोक्तातिव्याप्त्यप्रसक्तेः। उक्तोभयसम्बन्धेन प्रयोजकताविशिष्टान्यत्वस्य प्रयोजकतायां निवेशे मेयत्वविशिष्टावान्तरसत्प्रतिपक्षेऽतिव्याप्तिशङ्कापि नोचिता । प्रतिहेतुतावच्छेदकघटितसाध्याभावाभावत्वदवृत्तिमत्पक्षे वह्न्यभाववद्वह्न्यभावव्याप्यव्याप्यवद्वृत्तिवह्न्यभावव्याप्यव्याप्यवद्ध्रदे चातिव्याप्तिवारणाय विशिष्टान्तरविषयितात्वव्यापकजनकताकत्वस्य विवक्षणीयतया तदभावादेव मेयत्वविशिष्टावान्तरसत्प्रतिपक्षवारणात्तदर्थं स्वविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकताविशिष्टान्यत्वपर्यन्तस्यानावश्यकत्वात् । यद्यपि वह्न्यभावव्याप्यव्याप्यत्वविशिष्टेऽवान्तरसत्प्रतिपक्षे उक्तरीत्यातिव्याप्तिवारणाय तावत्पर्यन्तनिवेशस्यावश्यकता, तथापि तादृशविशेषणोपादानेऽपि तत्रातिव्याप्तिवारणासम्भवः , महासत्प्रतिपक्षविषयतानिष्ठप्रयोजकताया अपि मेयत्वविशिष्टावान्तरसत्प्रतिपक्षविषयतात्वव्यापकरूपावच्छिन्नत्वात् , जलव्यापकवह्न्यभावसमानाधिकरणजलव्यापको धूमाभाव इति निश्चयविशिष्टमेयत्वविशिष्टजलव्यापकवह्न्यभावसमानाधिकरणजलवान् ह्रद इति ज्ञानीयतादृशह्रदविषयितात्वस्य मेयत्वविशिष्टजलव्यापकवह्न्यभावसमानाधिकरणजलवद्ध्रदविषयतानिष्ठभेदप्रतियोगितावच्छेदकत्वान्निश्चयविशिष्टनिश्चयीयविषयत्वतदविशिष्टनिश्चयीयविषयित्वयोर्भेदविरहात् । अन्यथा विशिष्टान्तरविषयतात्वव्यापकरूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वाभावनिवेशेनैव जलवद्ध्रदविषयितामादायास-

म्भववारणसम्भवे भवतां विशिष्टान्तरे तादृशत्वनिवेशनवैफल्यापत्तेः । स्वावच्छिन्नविषयितात्वव्यापकतावच्छेदकप्रयोजकताविशिष्टान्यत्वस्य प्रयोजकतायां निवेशे तु मेयत्वशिष्टावान्तरसत्प्रतिपक्षवारणं सम्भवतीति बोध्यम् ।

मेयत्वविशिष्टे ह्रदवृत्तिवह्निव्यापकीभूताभावप्रतियोगिजलेऽतिव्याप्तिवारणाय स्वनिरूपितप्रयोज्यत्वाभावसमानाधिकरणप्रयोज्यतानिरूपितत्वस्यापि निरुक्तप्रयोजकतावैशिष्ट्यघटकत्वमावश्यकमित्यपि न युक्तम् । विशिष्टान्तरविषयित्वाव्यापकजनकत्वाभावादेव तत्रातिव्याप्तिविरहात् । नचैवमपि वह्न्यभावव्याप्यव्याप्यकत्वविशिष्टेह्रदवृत्तिवह्न्यभावाभावव्यापकीभूताभावप्रतियोगिजलेऽतिव्याप्तिवारणाय तादृशसम्बन्धस्यापि निरुक्तप्रयोजकतावैशिष्ट्यघटकत्वमावश्यकम् । तत्र विशिष्टान्तरविषयित्वाव्यापकजनकताकत्वस्यापि सत्त्वादिति वाच्यम्,—एवमपि वह्न्यभावव्याप्यव्याप्यविशिष्टं यज्जलव्यापकवह्न्यभावसमानाधिकरणजलं तद्विशिष्टह्रदेऽतिव्याप्तिसम्भवेन तावत्पर्यन्तानुधावनवैफल्यात् । तत्रापि जलव्यापकत्वप्रकारतानिरूपितवह्न्यभावत्वावच्छिन्नाविशेष्यताशालिनिश्चयविशिष्टनिश्चयीयजलवद्ह्रदविषयतात्वेन वह्न्यभावत्वावच्छिन्नविशेष्यतानिरूपितजलव्यापकत्वप्रकारताशालिनिश्चयविशिष्टनिश्चयीयजलवद्ह्रदविषयतात्वेन च विनिगमनाविरहेण प्रयोजकताद्वयस्य सत्त्वात् । यद्यप्युक्तरीत्या बाधघटितसत्प्रतिपक्षाव्याप्तिवारणाय विशिष्टान्तरविषयतानिष्ठप्रयोजकतायां स्वविषयतानिष्ठप्रयोजकताविशिष्टान्यत्वनिवेशे वह्न्यभावव्याप्यव्याप्यजलव्यापकवह्न्यभावकालीनजलाभाववह्न्यभयवानित्यत्र तादृशजलवद्ह्रदरूपबाधेऽतिव्याप्तिः , विशिष्टान्तरीभूतजलव्यापकवह्न्यभावकालीनजलवद्ह्रदविषयतानिष्ठप्रयोजकतायाः निरुक्तोभयसम्बन्धेन बाधविषयतानिष्ठप्रयोजकताविशिष्टत्वात् तदन्यविशिष्टान्तरविषयतानिष्ठप्रयोजकतानिरूपितप्रयोज्यताशून्यस्वविषयताप्रयोज्या-

धिकरणताकत्वादित्याशङ्क्य निरुक्तविशेषणादानेऽपि वह्न्यभावव्याप्यव्याप्याभाववह्न्यभयवानित्यत्र वह्न्यभावव्याप्यव्याप्यवद्ध्रदेऽतिव्याप्तेर्दुर्वारतया यद्रूपावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये विरोधिविषयताप्रयोज्यतावच्छेदकयद्रूपविशिष्टपक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नत्वे सति यद्रूपावच्छिन्नविषयताशालिनिश्चयाव्यवहितोत्तरानुमितिसामान्ये विरोधिविषयताप्रयोज्यतावच्छेदकतद्रूपविशिष्टधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावः तद्रूपावच्छिन्नविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वस्य विवक्षणीयतया पूर्वोक्तबाधेऽव्याप्त्यनवकाशादिति समाहितम्। तन्न, वह्न्यभावव्याप्यव्याप्याभाववह्न्यभयसाध्यकस्थले तादृशबाधविषयिताप्रयोज्यतावच्छेदकस्य ह्रदधर्मिकवह्न्यभावव्याप्यव्याप्याभाववैशिष्ट्यावगाहित्वाभावत्वस्य वह्न्यभावव्याप्यवद्ध्रदरूपसत्प्रतिपक्षविषयताप्रयोज्यतावच्छेदकत्वाभावेऽपि तादृशबाधविषयिताप्रयोज्यतावच्छेदकस्य ह्रदधर्मिकोभयवैशिष्ट्यावगाहित्वाभावस्य तादृशसत्प्रतिपक्षविषयताप्रयोज्यतावच्छेदकत्वेन तादृशबाधात्मकसत्प्रतिपक्षोन्नायकेऽतिव्याप्तेरवारणात् । व्यापकाभावप्रयोजकस्येति न्यायेन प्रत्येकवैशिष्ट्यावगाहित्वाभावप्रयोजकस्याप्युभयवैशिष्ट्यावगाहित्वाभावप्रयोजकत्वानपायात् । अन्यथा सत्यन्ताभावादेव पक्षसाध्यप्रसिद्ध्यन्नायकयोर्वारणे विरोध्यन्तद्वयवैयर्थ्यप्रसङ्गात् । वस्तुतस्तु उक्तोभयसाध्यकस्थले वह्न्यभावव्याप्यव्याप्यवद्ध्रदरूपबाधेऽतिव्याप्तिवारणाय पक्षसाध्यवैशिष्ट्यावगाहित्वाभावव्याप्याभावनिरूपितयादृशयादृशाधिकरणता सत्यन्तघटिका तादृशतादृशाधिकरणतासामान्यप्रयोजकविषयतानिरूपितावच्छेदकत्वमुन्नेयतावच्छेदकरूपविशेषणम्; तथा चोक्तस्थले वह्न्यभावव्याप्यव्याप्यवद्ध्रदरूपबाधे नातिव्याप्तिः, तत्र सत्प्रतिपक्षस्य तादृशबाधोन्नेयरूपस्य

तादृशबाधप्रयोजकविषयताप्रयोज्यह्रदधर्मिकोभयवैशिष्ट्यावगाहित्वाभाव-प्रयोजकविषयताकत्वेऽपि तादृशाधिकरणतासामान्यान्तर्गतह्रदधर्मिकवह्न्य-भावव्याप्यव्याप्याभाववैशिष्ट्यावगाहित्वाभावाधिकरणताप्रयोजकविषयता-कत्वाभावात् । ह्रदो वह्निमान् धूमादित्यादौ च सत्प्रतिपक्षविषयताप्रयो-ज्याधिकरणता सामान्यस्य बाधविषयताप्रयोज्यत्वादुन्नायके स-त्प्रतिपक्षे लक्षणसमन्वयः । तथा च स्वविशिष्टरूपाव-च्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नाविषय-ता तद्रूपावच्छिन्नत्वमिति लक्षणघटकदलद्वयपर्यवसितार्थः । रूपे स्ववैशि-ष्ट्यञ्च स्वसमानाधिकरणेत्यादिव्यापकत्वसम्बन्धेन, स्वाधिकरणता स्वनि-ष्ठावच्छेदकताकप्रतियोगिताकभेदविशिष्टपक्षसाध्यवैशिष्ट्यावगाहित्वाभाव-व्यापकाभावाधिकरणतात्वसम्बन्धावच्छिन्ना, तत्र स्वनिष्ठावच्छेदकता-स्व-समानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्ना । स्वाधिकरणता स्वावच्छिन्नविषयकनिश्चयाव्यवहितोत्तरत्वसम्बन्धेन । भेदप्रतियोगितावच्छेदकता विषयतायुक्तत्वविशिष्टस्वरूपसम्बन्धावच्छिन्ना । प्राथमिकभेद-प्रतियोगितावच्छेदकता स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वसम्ब-न्धेन । स्वनिष्ठावच्छेदकता स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्व-सम्बन्धावच्छिन्ना । स्वाधिकरणता स्वावच्छिन्नविषयकनिश्चयाव्यवहितोत्त-रानुमितित्वसम्बन्धावच्छिन्ना । भेदप्रतियोगितावच्छेदकता विषयतायुक्त-त्वविशिष्टस्वरूपसम्बन्धावच्छिन्नेति ।

॥ सत्प्रतिपक्षविभाजकपत्रं समाप्तम् ॥

कांच्यां—श्रीसुदर्शनमुद्रायन्त्रालये क्रय्याणि पुस्तकानि.

वैदिक ग्रन्थाः ।		
नं.	नाम	रु आ
१.	श्रीसूक्तभाष्यम्	० २
२.	पुरुषसूक्तभाष्यम्	१ ०
३.	तैत्तिरीयोपनिषद्भाष्यम्	३ ०
४.	सन्ध्यावन्दनभाष्यम्	० ८
	वेदान्त ग्रन्थाः ।	
५.	शतदूषणी भा—१	४ ६
६.	शतदूषणी भा-२	३ १२
७.	शतदूषणी भा--३	३ १२
८.	शतदूषणी भा-४	३ १२
९.	भगवद्गीता प्रतिपदार्थविवरणसहिता	२ २
१०	भगवद्गीता-वरवरमुनिव्याख्यासहिता	२ ४
११.	गीतार्थसंग्रहः-रक्षयासहितः	० ६
१२.	तत्वनिर्णयः (शैववैष्णववादः)	० ४
१३.	सिद्धान्तचिन्तामणिः	० १२
१४.	पाराशर्यविजयः (प्रथमाध्यायप्रथमपादः)	४ ०
१५.	वेदान्तविजयः [गुरुविद्यानिजयः, ब्रह्मविद्याविजयः, सद्विद्याविजयः, अद्वैतविद्याविजयः, परिकरविजयः] (यन्त्रस्थः)	

नं	नाम	रु आ
१६.	यतिलिङ्गसमर्थनम्	० ४
१७.	प्रपन्नपारिजातः	० ४
१८.	न्यायभास्करः (जगन्मिथ्यात्वखण्डनम्)	१ ८
१९.	भेदवादःतत्कतुन्याय विचारश्च	० ४
२०.	दृश्यत्वानुमाननिरास वादःमोक्षकारणतावादश्च	० ४
२१.	कार्याधिकरणवादःभा१	० १०
२२.	कार्याधिकरणवादःभा२	१ ०
२३.	कार्याधिकरणतत्वम्	० १४
२४.	श्रीरामानुजसिद्धान्तसारः	१ ०
२५.	श्रुतितात्पर्यनिर्णयः (यन्त्रस्थः)	
	मीमांसा ग्रन्थाः ।	
२६.	भाट्टरहस्यम्	१ ८
२७.	मीमांसापादुका	० ७
२८.	मीमांसाकौस्तुभःभा१	१ ४
२९.	मीमांसाकौस्तुभःभा४	१ ६
३०.	मीमांसाकौस्तुभःभा५	१ ६
३१.	सेश्वरमीमांसा	१ १४
	न्याय ग्रन्थाः ।	
३२.	प्रामाण्यवादः	३ ४
३३.	अवच्छेदकतानिरुक्तः	० १४

नं	नाम	रु	आ
३४.	बाधगदाधरी	०	१५
३५.	मूलगदाधरीये शब्दखण्डः	१	४
३६.	उपाधिवादः गदाधरस्य	२	०
३७.	गादाधरी चतुर्दशलक्षणी	१	१४
३८.	गादाधरी पञ्चलक्षणी	०	८
३९.	सिद्धान्तलक्षणम्	१	४
४०.	पक्षता-गादाधरी	१	८
४१.	व्युत्पत्तिवादः	२	८
४२.	సవ్యభిచారసామాన్య నిరుక్తిః	०	०
४३.	सामान्यनिरुक्तिः	०	१२
४४.	पदवाक्यरत्नाकरः	२	८
४५.	సాధారణాసాధారణ నుపసంహారవిరోధ గ్రన్థాః	०.	०
४६.	तत्त्वचिन्तामणौ अवयवग्रन्थः	१	०
४७.	सत्प्रतिपक्षग्रन्थः	०	१४
४८.	शतकोटिः	०	६
४९.	शतकोटिखण्डनम् श्रीकृष्णतार्किकाचार्यवि.	०	६
५०.	शतकोटिखण्डनम् श्रीमदनन्ताचार्यवर्यकृतम्	०	१२

नं	नाम	रु	आ
५१.	शतकोटिमण्डनम् विजयराघवाचार्यवि.	१	८

पाञ्चरात्र ग्रन्थाः ।

५२.	सात्वतसंहिता	२	८
५३.	ईश्वरसंहिता	७	८
५४.	पारमेश्वरसंहिता सव्याख्या	१०	०

सम्प्रदाय ग्रन्थाः ।

५५.	तत्वत्रयम्	०	
५६.	मुमुक्षुप्पडिरहस्यम्	०	
५७.	श्रीवचनभूषणम्	८	
५८.	श्रीवादिभीकरवैभवम् [सचित्रम्]	०	६
५९.	श्रीवादिभीकरवैभवम् [चित्ररहितम्]	०	४
६०.	கூவி. சூஷாய . உய.. ஷ்ப் கழி அண்ணவைபவம்	0	8
६१	అణ్ణావైభవమ్	०	३
62	அருளிச்செயல்ரஹஸ்யம்	0	4
६३.	ము క్ష్ోగావళీ	०	३
६४.	సచ్చరిత్ర పరిత్రాణమ్	०	०३
65.	ప్రహ్మవిద్యా	1	४
66.	విశిష్టాద్వైత సిద్ధాన్త సారం	0	2
67.	తత్వమసి	అశిల్	
68.	ఏకమేవాద్వితీయప్ర్రహ్మ	,,	
69.	వేదం.	0	2
70.	మోక్షమ.	0	2